एकादशः पटलः।

आकल्पान्तस्थास्नुभावेन भक्त्या
देवस्यैवं सम्प्रतिष्ठापितस्य।
प्रासादादिस्वाङ्गजीर्तिर्यदि स्या-
दुद्धृत्यातस्तं नवाङ्गीकरोतु।।१।।

विमर्शिनी

एवं दोषेषु सत्सु प्रायश्चित्तमभिहितम्[1]। तत्र कालादिवशात् प्रासादादीन्यङ्गानि जीर्यन्ते चेत् तत्परिहाराय एकादशेन पटलेन जीर्णोद्धारं वदन् आदौ तस्योद्देशं करोति- आकल्पान्तेति। भक्त्या हेतुना आकल्पान्तस्थास्नुभावेन प्रलयकालपर्यन्तं स्थिरतया स्थितिबुद्ध्या एवमुक्तप्रकारेण सम्प्रतिष्ठापितस्य देवस्य प्रासादादिस्वाङ्गजीर्तिः प्रासादबिम्बादीनां स्वाङ्गानां श्लथनं यदि स्याद् अतो जीर्णादङ्गादुद्धृत्य तं देवं नवाङ्गीकरोतु प्रत्यग्रावयवं करोतु।।१।।

विवरणम्

एवं सान्निध्यस्य प्रतिबन्धे सम्भवति तस्य शुद्धिरभिहिता यत्र[2] तु शुद्धावाधीयमानायामपि तदवस्थ एव प्रतिबन्धस्तत्र यत्नान्तरमपि विधेयम्। तत्प्रतिपादनार्थमारभते-

---

१.'तम्। ये त' क पाठः। २.'त्र यत्र शु' क पाठः।

Shripuram Publications
www.shripuram.org

आकल्पान्तस्थास्नुभावेनेति। कल्पान्तो नाम प्रलयकालः। यत्र देवस्सकला निजकार्यमूर्तिरपि संहरिष्यति। मर्यादायामाकारः। स्थास्नुः स्थितिशीलः। कुतस्तथा भावेन स प्रतिष्ठापितोऽवगत इति चेत्-

"यावदत्र जगन्नाथो बिम्बमाश्रित्य तिष्ठति।"

इति प्रतिष्ठासमय एव निवेदनात् तत्र चावधेर्देवेच्छाधीनतावगमात्। तथा च मन्त्रः-

"यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी।
तावत्त्वयात्र लोकेश स्थातव्यं सर्वदा विभो।।"

इति। एवमिति प्रागुक्तभूपरिग्रहादितीर्थस्नानपर्यन्तप्रकारानुवादः। प्रासादादिः प्रासादो बिम्बं तच्छेषभूतपीठादिकं च तस्य स्वाङ्गस्य स्वशरीरस्य स्थूलसूक्ष्मभेदेन प्राक्प्रतिपादितस्य सतो जीर्तिः कालवशाद्वाभिघातादिवशाद्वा यदि स्यादिति। यो नाम प्रतिबन्धः पुनरपि तदवस्थ एवेति तदीयं निमित्तमनेनाभिहितम्। तमत उद्धृत्य नवांगीकरोत्वित्य[1]न्वयः। नवं प्रथमप्रतिष्ठासिद्धमिवाङ्गं स्थूलं सूक्ष्मं वा यथायोगं यस्य स नवाङ्गः तत्समुचितव्यापारेणेत्यर्थाल्लभ्यते। तं देवं तस्माजीर्णात् स्थूलात् सूक्ष्माद्वाङ्गादुद्धृत्य तदेवं समुचितव्यापारेण नवं कृत्वा पुनस्तत्सम्बन्धेन देवं प्राग्वदवस्थितं कुर्यादित्यर्थः।।१।।

निष्क्रामणेन विधिनात्र तदन्तरङ्गे
वैकल्यभाजि वितनोतु यथापुरं तत्।
सङ्कोचनेन बहिरङ्गविपद्यदश्च
निष्क्रामणेन चिरकालचिकीर्षितं चेत्।।२।।

विमर्शिनी

अत्र जीर्णोद्धारे तदन्तरङ्गे बिम्बादौ वैकल्यभाजि विकलाङ्गतां प्राप्ते निष्क्रामणेन प्रासादाद् निर्यापनेन विधिना तदङ्गाद् देवमुद्धृत्य तदङ्गं यथापुरं पूर्ववदेव वितनोतु विरचय्य स्थापयतु। बहिरङ्गविपदि प्रासादादौ वैकल्यं प्राप्ते संकोचनेन परिवारांस्तत्त्वानि च संहृत्य हृदयकमले योजयित्वा तन्मुकुलविधिना यथापुरं वितनोतु। अदः बहिरङ्गं

१. 'त्यर्थः न' क पाठः।

Shripuram Publications
www.shripuram.org

चिरकालचिकीर्षितं चेत् चिरेणैव कालेन तदङ्गं क्रियते चेत् निष्क्रामणेन तद् यथापुरं वितनोतु।।२।।

विवरणम्

जीर्णोद्धारस्य भेदं वदंस्तस्य विषयमपि दर्शयति-निष्क्रमणेन विधिनेति। विधिर्जीर्णोद्धारलक्षणमनुष्ठानम्। वैकल्यभाजि तदन्तरङ्ग इति। जीर्णे तस्यान्तरङ्गभूते स्वाङ्गे प्रतिमापीठादावित्यर्थः। बहिरङ्गविपदि प्रासादो बहिरङ्गभूतं स्वाङ्गं तस्य विपदपि जीर्णतैव। चिरकालचिकीर्षितं चेददः बहिरङ्गभूतं स्वाङ्गं स्यात् तदा निष्क्रामणेनैव विधिना यथापुरं वितनोत्वित्यनुषङ्गः।।२।।

बालालयादिसहितं कलशैककार्यं
चेति द्विधात्र खलु निष्क्रमणं स्मरन्ति।
सङ्कोचनं स्वविभवस्वनिगूहनं स्या-
न्निष्क्रामणक्रममिह प्रथमं ब्रवीमि।।३।।

विमर्शिनी

अत्र खलु जीर्णोद्धारे बालालयादिसहितं बालालयोऽल्पगृहं तेन सहितं, कलशैककार्यम् एकेन कलशेनैव निर्वर्त्यं चेति द्विधा द्विप्रकारेण निष्क्रमणं स्याद् बिम्बादुद्वास्य बहिःप्रापणं स्मरन्ति विद्वांसः। संकोचनं तु स्वविभवस्वनिगूहनं स्वस्य विभवस्य तत्त्वरूपेण परिवाररूपेण च व्याप्तेः स्वस्मिन्नेव निगूहनं हृदयकमल एव गोपनं स्यात्। इह प्रथममहं निष्क्रामणक्रमं ब्रवीमि।।३।।

विवरणम्

अधुना निष्क्रामणरूपस्य जीर्णोद्धारभेदस्यापि भेदमसम्मोहाय दर्शयति-बालालयादिसहितमिति। बालबिम्बादिरादिशब्दार्थः। ननु बालबिम्बजीवकलशसम्बन्धे जीर्णोद्धारपदार्थोऽयुक्तो न तु सङ्कोचने तत्राह-सङ्कोचनं स्वविभवस्वनिगूहनं स्यादिति। स्वस्य[१] विभवस्य प्रासादपुरुषद्वाः स्थादिपरिषत्प्रभृतिरूपस्य स्वस्मिन्[२] निगूहनमाकृष्यावस्थापनं बहिरङ्गजीर्तौ हि तस्माज्जीर्णात्तत्समाविष्टस्यांशस्याजीर्णेऽन्तरङ्गभूते बिम्ब एव बालबिम्बजीवकलशयोरिवोद्धारात् सङ्कोचनमपि जीर्णोद्धारभेद एव स्यादित्यर्थः।।३।।

१.'स्व' च पाठः। २.'त' क पाठः।

Shripuram Publications
www.shripuram.org

मूलालयादक्षिणभागसंस्थं तत्सम्मुखं बालगृहं विधाप्य।
समण्डपं शिल्पिभिरल्पबिम्बं प्रकल्पयेल्लौहिकमाङ्घ्रिपं वा।।४।।

विमर्शिनी

तत्र मूलालयादक्षिणभागसंस्थं मूलप्रासादस्याग्रतो वामभागस्थितं तत्संमुखं मूलप्रासादाभिमुखं समण्डपं तत्पुरोभागस्थितेशमण्डपेन च सहितं बालगृहल्पगृहं शिल्पिभिः विधाप्य कारयित्वा लौहिकं लोहमयम् आङ्घ्रिपं दारवं वाल्पबिम्बं प्रकल्पयेत्।।४।।

विवरणम्

मूलालयादक्षिणभागसंस्थमिति। दक्षिणशब्देन प्राजापत्यो दैविकश्च देशविशेषस्तन्त्रेण गृह्यते।[1] तद्विरुद्धश्चादक्षिणो भागः। एतदर्थमेवात्रोत्तरवामशब्दानुपादनम्। तत्सम्मुखं मूलप्रासादस्य तत्प्रतिदिग्गतयोनिपरिग्रहेणाभिमुखम्।

समण्डपमित्यधिवासमण्डपमावश्यकतमत्वादभिप्रेतम्। अङ्घ्रिपो वृक्षः तद्विकार आङ्घ्रिपम्।।४।।

अत्राप्यङ्कुररोपणं प्रथमतः कृत्वा गृहीत्वा नवं
बिम्बं वार्यधिवास्य बालनिलयं संशोध्य तन्मण्डपम्।
संस्कृत्योदकतोऽल्पबिम्बमुपनीय स्नापयित्वा पुन-
स्तत्तद्बिम्बघटैः प्रणीय शयनीये[2] शाययेद् देशिकः।।५।।

विमर्शिनी

अथ देशिकः अल्पगृहाल्पमण्डपाल्पप्रतिमादीनां लक्षणज्ञो गुरुः अत्रापि कर्मणि प्रथमतः पूर्वं बालालयोदग्भागस्थगृहे सप्ताहादिकालेऽङ्कुरारोपणं कृत्वा नवं बिम्बम् अल्पबिम्बं गृहित्वा वारि जलेऽधिवास्य बालनिलयमल्पगृहं संशोध्य यथाक्रमं प्रासादशुद्धिं कृत्वा तन्मण्डपं बालालयाग्रगतं मण्डपं संस्कृत्य उदकतो जलात् अल्पबिम्बमुपनीय तत्तद्बिम्बघटैः तस्य तस्य देवस्योक्तैर्बिम्बशुद्धिकलशैः स्नापयित्वा पुनः शयनीये तन्मण्डपस्थशय्यायां प्रणीय शाययेत् यथोक्तविधिनाधिवासं कुर्यात्।।५।।

१.'तत्तद्वि' क पाठः। २.'ने संवेशयेत्' ख पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

प्रथमतः कृत्वेति। प्रथम[1]प्रतिष्ठोक्तरीत्या बालबिम्बाधिवासदिवससमुचिते सप्तमादिदिवसे बालगृहसमुचितबीजाङ्कुरमण्डपेऽङ्कुरारोपणं कुर्यादित्यर्थः।।५।।

तत्र त्रिसूत्राकलनादि मूलप्रासादशुद्धिं विधिवद् विधाय।
प्रक्षालनाद्याश्च यथार्हकालं कुर्वीत मूलप्रतिमाविशुद्धीः।।६।।

विमर्शिनी

तत्र पुनर्यथार्हकालं त्रिसूत्राकलनादि तन्तुवेष्टनमारभ्य मूलप्रासादशुद्धिं विधिवत् यथोक्तप्रकारेण विधाय प्रक्षालनाद्याः सप्त मूलप्रतिमाविशुद्धीः कुर्वीत।।६।।

विवरणम्

विधिवदिति। जीर्णताया एव शुद्धिनिमित्तत्वादपि शुद्धिरादरेण कर्तव्येत्यभिप्रायः।।६।।

संस्नाप्य देवमथ निष्कृतितत्त्वहोम-
सम्पातसिद्धकलशैः कलशैः परैश्च।
प्राच्र्य प्रसाद्य परिषत्सु बलिं विकीर्य
प्रार्थ्यारभेत सुसमीहितकर्[2]म मन्त्री।।७।।

विमर्शिनी

अथ मन्त्री प्रायश्चित्तपटलोक्तविधिज्ञो गुरुः निष्कृतितत्त्वहोमसंपातसिद्धकलशैः प्रायश्चित्तहोमादिभिः सिद्धैः संपातकलशैः तत्त्वहोमसंपातकलशेन च देवं संस्नाप्य पुनः परैः स्वस्वोक्तद्रव्यकलशैश्च संस्नाप्य प्राच्र्य विशेषतः पूजां कृत्वा प्रसाद्य परिषत्सु परिवारेषु भूतबलिं च विकीर्य वक्ष्यमाणरीत्या प्रार्थ्य सुसमीहितकर्म सङ्कल्पितं निष्क्रामणं कर्म सावधानं प्रारभेत।।७।।

विवरणम्

निष्कृतिहोमास्तत्त्वहोमश्च निष्कृतितत्त्वहोमाः। परैश्चकलशैरिति। द्रव्यकलशैरपीत्यर्थः। प्राच्र्येति। यत्र पूजायां द्रव्यकलशाभिषेकः कृतस्तच्छेष उक्तः। यद्वा विधिवदिति

१.'मत प्र' क पाठः। २.'र्म सम्यक्।' ख पाठः।

Shripuram Publications
www.shripuram.org

सर्वत्र सम्बध्यते। तेन त्रिदिनं पञ्चदिनं वा पूजाबली कृत्वा तदन्ते प्रार्थनमपि सान्निध्यविशेषापेक्षया सिद्धं भवति। प्रार्थनमन्त्रस्तु "शृण्वन्तु देवतास्सर्वाः" इत्यादिर्वक्ष्यते। समीहितशब्दोऽभीसिप्तपर्यायः। चिकीर्षितं निष्क्रमणकर्मेत्यर्थः।।७।।

मूलालयाग्राहितमण्डपस्थे कुण्डे समुत्पाद्य कृपीटयोनिम्।
तत्पार्श्वदेशे कलशं प्रपूर्य कुर्याद् गुरुः संहृतितत्त्वहोमम्।।८।।

विमर्शिनी

पुनर्गुरुः स्वयमवहितो भूत्वा मूलालयाग्राहितमण्डपस्थे मूलप्रासादस्याग्रमण्डपस्थिते कुण्डे कृपीटयोनिमग्निं समुत्पाद्याग्निमुखं कृत्वा परिधिस्थापनात् पूर्वं तत्पार्श्वदेशे कलशं यथोक्तरीत्या प्रपूर्य संपूज्य परिधिस्थापनादिपूर्वं संहृतितत्त्वहोमं संहारार्थं तत्त्वहोमं कुर्यात्।।८।।

विवरणम्

तत्र प्रथमं तावत् संहारतत्त्वहोममाह-मूलालयेत्यादिना। कृपीटयोनिरग्निः। तत्पार्श्वदेशे कलशं प्रपूर्येति। तत्प्रकारस्तु सृष्टितत्त्वहोम एव प्राक् प्रतिपादितः।।८।।

सम्पातमस्मिन् प्रसमर्प्य कुम्भे पूजामनुद्रव्यहुतिप्रसिद्धम्।
सृष्टिक्रमेणाखिलतत्त्वमन्त्रैः सकृत् सकृत् सर्पिरथो जुहोतु।।९।।

विमर्शिनी

तत्क्रियाक्रममाह-सम्पातमिति। अस्मिंस्तत्त्वमये कुम्भे पूजामनुद्रव्यहुतिप्रसिद्धं पूजामन्त्रहोमात् प्राप्तं तदनन्तरमेव द्रव्यहोमं च कृत्वा तत्र सिद्धं च संपातं प्रसमर्प्य अथो अखिलतत्त्वमन्त्रैः सृष्टिक्रमेण सकृत् सकृत् सर्पिर्जुहोतु।।९।।

विवरणम्

पूजामनुद्रव्यहुतिप्रसिद्धं प्रणवव्याहृतिपीठप्रणवोपचारमूलाङ्गपरिवारमन्त्राज्यहोमसिद्धं समिदादिद्रव्यहोमसिद्धं च।।९।।

गत्वा गर्भगृहं समिष्टनिजपीठे देवमास्थाप्य तं
तत्त्वन्यासपुरस्सरं सकलितं कृत्वा समभ्यर्च्य च।

Shripuram Publications
www.shripuram.org

तत्सम्पातघृतं समर्प्य परिपूर्णं भावयित्वा ततः
संहारानुमतिं विकीर्य कुसुमं सम्प्रार्थयेत् साञ्जलिः ।।१० ।।

विमर्शिनी

ततो गर्भगृहं गत्वा समिष्टनिजपीठे पीठपूजानन्तरं देवमास्थाप्य आवाह्य तत्त्वन्यासपुरस्सरं तत्त्वन्यासादिभिः तं देवं सकलितं कृत्वा समभ्यर्च्य तत्सम्पातघृतं च समर्प्य तं निखिलैः परिवारैर्निखिलैस्तत्त्वैश्च परिपूर्णं भावयित्वा ततः कुसुमं विकीर्य साञ्जलिः अञ्जलिमुद्राबन्धपूर्वं संहारानुमतिं संहारार्थमनुज्ञां देवं प्रार्थयेत् ।।१० ।।

विवरणम्

देवमास्थाप्येत्यावाहनमुक्तम् । तत्सम्पातघृतं समनन्तरोक्तसृष्टितत्त्वमन्त्राहुतिसिद्धं समर्पणञ्च तत्तत्तत्त्वस्थाने क्रमेण कार्यम् । परिपूर्णं भावयित्वेति । सर्वतो देहे सकलतत्त्वसामग्र्युदयेन पूर्णमत एव परितो महासालपर्यन्तं च सकलपर्षदादिलक्षण-सामग्र्युदयेन पूर्णमित्यर्थः ।।१० ।।

लब्धाज्ञो गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां
नाडीयोगकृते ध्रुवेण कुसुमं दत्त्वा समेत्यानलम् ।
कृत्वा तत्र हुताशने च कलशे चैवं प्रसूनाञ्जलिं
मूलेनाष्ट घृताहुतीर्वितनुयात् तत्कर्मसांमुख्यदाः ।।११ ।।

विमर्शिनी

ततो लब्ध्वाज्ञः गृहीतानुज्ञो भूत्वा नाडीसन्धानं कुर्यात् । तत्परिपाटीमाह-गृहेत्यादिना । गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां प्रासादमूर्तेः कुण्डस्य कलशस्य च क्रमात् प्रितिमाया अग्नेर्जलस्य च तेषां चैतन्यायां च नाडीयोगकृते तत्त्रितयस्य नाडीनां योगार्थं प्रथमं देवाय ध्रुवेण प्लुतप्रणवेन कुसुमं त्रिशो दत्त्वा अनलं कुण्डस्थाग्निसमीपं समेत्य तत्र हुताशने अग्नौ च कलशे च एवं प्लुतप्रणवेन त्रित्रिवारं प्रसूनाञ्जलिं कृत्वा एवं नाडीसन्धानानन्तरं पुनर्मूलेन तत्कर्मसांमुख्यदाः तस्य संहारकर्मण आभिमुख्यदानायाष्ट घृताहुतीर्वितनुयात् ।।११ ।।

Shripuram Publications
www.shripuram.org

विवरणम्

गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां गृहमूर्तिः प्रासादः उदर्चिरग्निः प्रासाद-कुण्डकलशस्थायिनां बिम्बाग्निजलरूपाणां देवानामित्यर्थः। नाडीयोगकृते ध्रुवेण कुसुमं दत्त्वेति। कृत्स्न[1]क्षेत्रव्याप्तिमतः स्वव्याप्त्यारोपितसकलप[2]रिषदादिदेवतानिचयस्य प्रासादान्तर[3]वर्तिष्ठमानस्य बिम्बाभिमानिनो देवस्येडापिङ्गलासुषुम्नाख्यनाडीनां कुण्डकलशस्थाग्निजलाभिमानिदेवनाडीभिः सन्धानमनुसन्दधानो दे[4]वे पुष्पाञ्जलिं प्रणवेन त्रिमात्रात्मकेन कुर्यादित्यर्थः। एवमग्नौ कलशे चार्थोऽवगन्तव्यः। तत्कर्मसाम्मुख्यदा इति। तदिति प्रक्रियमाणस्संहारो गृह्यते। संहारकर्मणि साम्मुख्यमाभिमुख्यं बिम्बाभिमानिनो देवस्य कालमूर्त्यात्मना स्वेन क्रियमाणे संहारकर्मण्यानुकूल्यमिति यावत्। तत्प्रयच्छन्ति प्रयुञ्जत इति तथोक्ताः। स्वारोपितसकलदेवतानिचय[5]स्य देवस्य नाडीद्वाराग्निगतदेवता-दात्म्येनावस्थानं कल्पयन्नित्यभिप्रायः।।११।।

क्षेत्राधिपादिप्रतिहारकान्तैर्निर्माल्यधार्यादिगुरूत्तमान्तैः।
हुत्वैकशः पूर्वमथो यथाशक्त्यावृत्य सर्पिर्जुहुयादमीभिः।।१२।।

विमर्शिनी

ततः क्षेत्राधिपादिप्रतिहारकान्तैः क्षेत्रपालमारभ्य संहारक्रमेण द्वाःस्थपर्यन्तैर्बलि-परिवारमन्त्रैः पुनर्निर्माल्यधार्यादिगुरूत्तमान्तैः स्वस्वनिर्माल्यधारिणमारभ्य संहारक्रमेण स्थितैः परिवारमन्त्रैः समष्टिमारभ्य प्रतिलोमस्थितैः गुरुपर्यन्तैः पीठमन्त्रैश्च एकशः सकृत् सर्पिर्हुत्वा अथो अमीभिः वक्ष्यमाणैर्मन्त्रैर्यथाशक्ति अष्टशतादिसंख्यमावृत्य सर्पिर्जुहोतु।।१२।।

विवरणम्

इदानीमग्न्युपाधिद्वारा सर्वसंहारं वदन् प्रथमं बहिरङ्गत्वा[6]त् प्रतिष्ठासमये तत्तत्स्थानेषु कल्पितानां दिशाहोमादिभिः प्रतिष्ठापितानां च बलिपरिवाराणां स्वव्यापके देवचैतन्ये संहारमाह-क्षेत्राधिपादिप्रतिहारकान्तैरिति। प्रतिहारकशब्दो द्वाःस्थपर्यायः। अथ पूजापरिवाराणां पीठशक्तीनां चाह-निर्माल्यधार्यादिगुरूत्तमान्तैरिति। अथ देवदेहगतानामाधिवासतत्त्वहोमादिभिर्विभावितानां तत्त्वानां यत्नतसंहारमुद्दिशतिःअथो

१.'तु क्षे' क पाठः। २.'पर्षदा' ३.'रे' ४.'वं' क पाठः। ५.'स्य ना' ६.'त्वप्र'

Shripuram Publications
www.shripuram.org

यथाशक्त्यावृत्य सर्पिर्जुहुयादमीभिरिति।।१२।।

पुरः कोपतत्त्वेन तद्वत्यशेषे
ततः क्ष्मादिकाव्यक्तपर्यन्ततत्त्वैः।
कृशान्वादिहृत्पुण्डरीकावसानै-
र्विशेषान्वितैः स्वैर्हुनेच्चेषुतत्त्वैः[१]।।१३।।

विमर्शिनी

ततः तद्वति कोपतत्त्ववति विष्ण्वादौ पुरः आदौ कोपतत्त्वेन, अशेषे सर्वदेवेषु ततः क्ष्मादिकाव्यक्तपर्यन्ततत्त्वैः पृथिवीतत्त्वादिप्रकृत्याख्यप्राणपर्यन्तैश्चतुर्विंशतितत्त्वैः, शिवे तु शक्तितत्त्वान्तैः पञ्चत्रिंशत्तत्त्वैः, पुनः सर्वेषु कृशान्वादिहृत्पुण्डरीकावसानैः अग्निमण्डलसोममण्डलसूर्यमण्डलहृत्पुण्डरीकैः, पुनर्विशेषान्वितैः द्वादशे पटले वक्ष्यमाणविशेषयुक्तैः स्वैः स्वैः इषुतत्त्वैः पञ्चतत्त्वैश्च हुनेत्।।१३।।

विवरणम्

विवृणोति-पुरःकोपतत्त्वेन तद्वतीत्यादिना। तद्वति विष्णुहरिहरादौ। ततः अशेष इति क्रमः। क्षमा पृथिवि, अव्यक्तमुपोत्तमं तत्त्वं, कृशानुर्वह्निमण्डलम्।।१३।।

पञ्चतत्त्वानां विशेषान् पुर्यष्टकप्राणसंहारसिद्धये दर्शयति - *सर्वाद्यादिषु तत्त्वकेष्विति। सर्वादीनीह[२] सर्वनिवृतिपूर्वाणि। यथादेवतं तत्त्वानि तान्यादयो येषां तानि सर्वाद्यादीनि प्रातिलोम्येनावस्थितेषु निजनिजेषु पञ्चतत्त्वेष्विति यावत्। निजास्तत्तत्तत्त्वसम्बन्धिनो मूर्तयो नारायणसद्योजातादयः। गन्धादिभिस्तेषां तत्त्वानामेव

१.'त्वैः।।

सर्वाद्यादिषु तत्त्वकेषु निजमूर्त्यन्तेषु गन्धादित
त्तन्मात्रोल्लसितस्वरूपपदमादायान्तमन्ते पुनः।
ङेन्तात्मान्तसमानपूर्वकनिजप्रणान् नमोन्तान् वदे
देवं संहृतिपञ्चततत्वमनवः प्रोक्ता विशेषान्विताः।।

जी' ख. पाठः। २.'नि स'

* अधिकपाठमवलम्ब्य प्रवृत्तेयं व्याख्या।

Shripuram Publications
www.shripuram.org

सम्बन्धिभिस्तन्मात्रैरुल्लसितमायान्तं स्वरूपपदं वदेत्[१]। गन्धतन्मात्रस्वरूपायेत्यादिकमित्यर्थः। ङेन्त आत्मा तदन्तास्समानपूर्वका निजास्तत्तत्तत्त्वसम्बन्धिनः प्राणाः समानात्मने नम इत्यादिकमुक्तम्।।

जीवेन सर्वेषु शिवेऽन्तिमेन शिवेन चैतत्परमीक्रियायै।
[२]यथोक्तसङ्ख्यावसितौ जुहोतु पूर्णाहुतिं च प्रतितत्त्वमत्र।।१४।।

विमर्शिनी

पुनः एतत्परमीक्रियायै एतस्य देवस्य परत्वप्राप्तये सर्वेषु देवेषु जीवेन जीवनतत्त्वेन शिवे अन्तिमेन शिवत्त्वेन च जुहोतु। यथोक्तसंख्यावसितौ उक्तानां संख्यानामवसाने प्रतितत्त्वं तत्त्वे तत्त्वे च यथोक्तपूर्णाहुतिं च जुहोतु।।१४।।

विवरणम्

अधुना चरमत्तत्त्वहोममाह-जीवेन सर्वेष्विति। सर्वेषु जीवतत्त्वमन्त्रेण शिवे शिवतत्त्वमन्त्रेण च जुहोतु। अन्तिमेनेति विशेषणं तस्य संहारो नावकल्पत इति प्रतिपादनार्थम्। तर्हि किमर्थं होमः तत्राह-एतत् परमीक्रियायै इति। एतस्य चरमतत्त्वस्य क्रियादिशक्त्युपसंहारेण परभावसिद्धय इत्यर्थः।।१४।।

सर्वत्र सङ्ख्याष्टशतं समुक्ताथाष्टोत्तरा विंशतिरष्ट वात्र।
जुहोतु शर्वे निजपञ्चतत्त्वैरुद्‌घातवृत्त्यैकश एव वान्यैः।।१५।।

विमर्शिनी

अथ अत्र सर्वत्र तत्त्वेषु अष्टशतं वा अष्टोत्तरा विंशतिर्वा अष्ट वा संख्या समुक्ता। शिवे निजपञ्चत्त्वैः उद्‌घातवृत्त्या जुहोतु। उद्‌घाता वृत्तिर्नाम ऊर्ध्वोर्ध्वं हननेन ह्रासेनावृत्तिः। तत्र प्रथमेन तत्त्वेन पञ्चविंशत्यधिकं शतं, द्वितीयेन शतं, तृतीयेन पञ्चसप्ततिः, चतुर्थेन पञ्चाशत्, पञ्चमेन पञ्चविंशतिरित्यादिसंख्याविभागेनेत्यर्थः। अन्यैः पञ्चविंशत्तत्त्वैः एकैकश एव वा जुहोतु।।१५।।

विवरणम्

यथाशक्त्यावृत्त्योति यदुक्तं तदभिप्रायमाह-सर्वत्र संख्येति। उद्धातवृत्तिरुद्धातानुगणा वृत्तिः, यथा प्रथमेन पञ्चगुणं द्वितीयेन चतुर्गुणं तृतीयेन त्रिगुणं चतुर्थेन द्विगुणं शान्त्यतीततत्त्वेनैकगुणमिति।।१५।।

१.'तत्त्व' क पाठः। २.'जुहोतु सङ्ख्यावसितौ यथोक्तपू' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org

सूत्रच्छिदाकर्मणि हुंफडन्तान्युक्तानि तत्त्वानि न चापरत्र।
तथैव निष्क्रामणकर्मवर्जं विशेषवत्त्वं न च पञ्चसूक्तम्।।१६।।

विमर्शिनी

सूत्रच्छिदाकर्मणि सूत्रच्छेदो नामायतनाद् बिम्बस्योद्धारः तत्र होमादौ योजनीयानि तत्त्वानि हुंफडन्तान्येवोक्तानि। अपरत्र सूत्रच्छेदेन विना निष्क्रमादौ न हुंफडन्तत्वमुक्तम्। तथैव निष्क्रामणकर्मवर्जं निष्क्रामणकर्मणोऽन्यत्र पञ्चसु तत्त्वेषु विशेषवत्त्वं विशेषयोजनं च नोक्तम्।।१६।।

विवरणम्

तत्त्वमन्त्रेष्वेवापरं विशेषं दर्शयंस्तस्य विषयमपि दर्शयति-सूत्राच्छिदाकर्मणि सूत्रं नामेह सकलतत्त्वेषु मूलप्रकृतितयानुस्यूतं मायासूत्रं गृह्यते। तद्धि सर्वतत्त्वसंहारपूर्वकं तत्स्थे जीवे बालबिम्बजीवकलशयोर्निष्क्रमितेऽपि मूलबिम्बं न परिजहाति। यदा पुनर्मूलबिम्बमपि भङ्गगर्भादिसम्भवात् परित्यजनीयं स्यात् तदा मायासूत्रमपि तस्मानिरनुशयं जीवेन सह निष्क्रमणीयम्। तदर्थं सूत्रस्य तत्तत्तत्त्वसूत्रसंहारे तेन तेन सह छेदः सूत्रच्छेदः तदर्थं कर्म निष्क्रामणं सूत्रच्छिदाकर्म। न चापरत्रेत्यवधारणं प्रमादपरिहारार्थं, बिम्बापरित्यागे सङ्कोचे वा मा भूत् प्रमाद इति भावः। पञ्चसु तत्त्वेषु यदिह विशेषवत्वमुक्तं तन्निष्क्रामणवर्जमपरत्र तथैव न भवतीत्यर्थः। अयमपि प्रमादपरिहारार्थम्।।१६।।

कनिक्रदत्स्वस्तिसमुत्थमन्त्रैः सकृत् सकृन्निष्क्रमणे जुहोतु।
सूत्रच्छिदायां च चतुर्गृहीतं वास्तोष्पतेप्रत्यृगणुद्वयेन[१]।।१७।।

१.'न।।

होमं समाप्य कलशे ग्रसमर्प्य तत्त्वसम्पातसर्पिरितरद्वितयं सुरक्षेत्।
अग्रे निधाय दहनं कलशं च पार्श्वे संपुज्य तस्य तनुयादथ शान्तिहोमम्।।
साविव्याष्ठसहस्रमत्र जुहुयाद् दूर्वास्त्रिमध्वाप्लुता
भूराद्यैरपि वा पयोद्रुसमिधः संपातमेतद्घटे।
सिक्त्वाज्यं निजपञ्चतत्त्वमनुभिर्हुत्वाष्टशस्तद्भवं
सम्पातं परिरक्ष्य वह्निगतचैतन्यं घटे योजयेत्।।

तेनाभिषिच्य विधिवत् प्रयजेच्च देवमुद्वास्य तत्त्वकलशे चितिमग्निसंस्थाम्।
उद्वास्य चिन्मयतया परिकल्प्य नीत्वा देवाग्रतो न्यसतु तं सुसमिष्टपीठे।। निर्गत्य' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

निष्क्रमणे तु कनिक्रदत्स्वस्तिमुत्थमन्त्रैः 'कनिक्रदज्जनुषम्' इत्यादिमन्त्रैः 'स्वस्ति नो मिमीताम्' इत्यादिमन्त्रैश्च सकृत् सकृत् सर्पिर्जुहोतु। सूत्रच्छिदायां सूत्रच्छेदनिमित्ते वास्तोष्पतेप्रत्यृगणुद्वयेन 'वास्तोष्पते प्रतिजानीहि' 'वास्तोष्पते शग्मया' इति मन्त्राभ्यां चतुर्गृहीतं चतुर्गृहीतपूर्णाहुतिं च जुहोतु।।१७।।

विवरणम्

सूत्रच्छिदायां चतुर्गृहीतञ्चेत्यन्वयः। द्वयेनेति वचनं द्वाभ्यां सहैक एव होम इति द्योतनार्थम्।।१७।।

*होमं समाप्येति। स्विष्टकृतादिसामान्यन्यायेनेत्यर्थः। इतरद्वितयं यात्राहुतिसम्पातं वास्तोष्पतिहोमसम्पातं च। अथ शान्तिहोममाह-अग्रे निधायेत्यादिना। तस्य पार्श्वे कलशं सम्पूज्येत्यन्वयः।।

भूराद्यैरपि वा पयोद्रुसमिध इति विकल्पः। पयोद्रुमाश्च तोरणक्रमेण ग्राह्याः।।

शान्तिकलशाभिषेकमाह-तेनेति। कलशस्थबिम्बस्थयोर्देवयोः पूर्वमेव नाडीसन्धानस्य कृतत्वात्तन्मार्गेण बिम्बप्राप्त्यनुसन्धानं कृत्वा पूजनं कार्यम्। विधिवदिति। जीवोद्वासने कृते पश्चाद्वा कलशविनियोग इत्यभिप्रायः। तत्त्वहोमशेषमाह-उद्वास्येति। उद्वासनं सर्वतत्त्वैरपि यथोक्तनयेन व्युत्क्रमेण पठि[१]तैः पादादिमूर्धान्तं व्यापय्य हृदये परिसमापनम्। देवाग्रतो नीत्वेत्यन्वयः।।

गत्वा गर्भगृहं विधाय परमान्नप्रीणनाद्यं विभो-
स्तद्धोमं सुसमाप्य तत्त्वकलशे सम्पातपातादिकम्।
कृत्वा स्वस्तिकविष्टरेऽन्तरुपनीय[२] स्थापयेदग्रतो
यात्राद्याहुतिसाधिताज्ययुगलं चास्थाप्य रक्षेत् क्वचित्।।१८।।

विमर्शिनी

एवं कृत्वा गर्भगृहं गत्वा विभोर्देवस्य परमान्नप्रीणनाद्यं पायसं निवेद्य तत्कुण्डस्थाग्नावेव पूजाहोमं विधायान्तर्गत्वा निवेद्यविसर्जनं कृत्वा प्रसाद्य प्रसन्नपूजानन्तरं बहिरागत्य तद्धोमं स्विष्टकृद्धोमादिना सुसमाप्य तत्त्वकलशे सम्पातपातादिकं

१. 'ति' घ पाठः। २. 'या' इति मूनकोशपाठः। *अधिकपाठमाश्रित्येयं व्याख्या

Shripuram Publications
www.shripuram.org

सम्पातस्पर्शाग्न्युद्वासनादिकं कृत्वा अन्तः देवस्याग्रतः स्वस्तिकविष्टरे पूजितपीठे स्वस्तिके तत्त्वकलशमुपनीय स्थापयेत्। यात्राद्याहुतिसाधिताज्ययुगलं च 'कनिक्रदा'दिहोमसाधितं 'वास्तोष्पति'होमसाधितं च संपातं क्वचित् प्रदेशे आस्थाप्य रक्षेत्।।१८।।

निर्गत्य विप्रान् विदुषः समूह्य प्रसाद्य हेमादिसमर्पणेन।
देवं च तत्तन्मनुना प्रणम्य कृताञ्जलिः कर्म निवेदयेत।।१९।।

विमर्शिनी

पुनर्निर्गत्य विदुषः प्राज्ञान् विप्रान् समूह्य अग्रमण्डपे समूहीकृत्य हेमादिसमर्पणेन सुवर्णादिदानेन प्रसाद्य तत्तन्मनुना स्वस्वोक्तमन्त्रेण देवं च प्रणम्य तत्र कृताञ्जलिः स्थित्वा तच्चिकीर्षितं कर्म निवेदयेत।।१९।।

विवरणम्

तत्र होमशेषेऽपि सम्प्रति संहारांगतया लोकसम्मतिं कर्तव्यां तावद्दर्शयति[१]- निर्गत्येति। तत्तन्मनुनेति।।१९।।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।२०।।

नमः शिवाय साम्बाय सगणाय ससूनवे।
प्रधानपुरुषेशाय सृष्टिस्थित्यन्तहेतवे।।२१।।

पूजाबिम्बमिदं विष्णोः स्थापितं पूर्वसूरिभिः।
अनेन दूषणेनाद्य दूषितं चेह वर्तते।।२२।।

दुष्टबिम्बस्य चोद्धारः कर्तव्य इति शासनम्।
आगमस्य वयं कर्तुं व्यवसायमुपास्महे।।२३।।

अ[२]त्रेदं यदि कर्तव्यमागमार्थतया भवेत्।
भवन्तो नोऽनुजानन्तु भवेमाज्ञाकरा वयम्।।२४।।
इति।।

१.'ति–त' क पाठः। २.'त' ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

प्रणामादौ विहितान् मन्त्रान् लिखति-नम इत्यादि ।।२०-२४।।

विवरणम्

नमो ब्रह्मण्येति वैष्णवे मन्त्रः ।।२०।।

नमः शिवायेति शैवे ।।२१।।

पूजाबिम्बमित्यादि निवेदनमन्त्रः ।।२२।।

आद्योऽजितेऽणुः प्रणतौ द्वितीय-
स्त्र्यक्षे स्वमूलादिरतःपरेषु ।

विज्ञापनेऽन्यत् त्रितयं हरौ तत्
परेषु किञ्चिद्भिदुराद्यपादम् ।।२५।।

विमर्शिनी

उक्तानां स्तोत्रमन्त्राणां विभागमाह-आद्य इति । एषु मन्त्रेष्वाद्यो 'नमो ब्रह्मण्यदेवाय' इत्याद्योऽजिते प्रणतौ नमस्कारे अणुः । द्वितीयो 'नमः शिवाय' इत्याद्यस्त्र्यक्षे प्रणतावणुः । अतः परेषु शिवनारायणादिषु स्वमूलादिरणुः । अन्यत् त्रितयं 'पूजाबिम्बमिदंम्' इत्यादिपद्यत्रयं हरौ विषये ब्राह्मणेभ्यो विज्ञापनेऽणुः स्यात् । परेषु देवेषु किञ्चिद्भिदुराद्यपादं 'पूजालिङ्गमिदं शम्भोः' इत्यादिभेदिताद्यपादं तदेव त्रयम् ।।२५।।

विवरणम्

तदेतद्दर्शयति-आद्योऽजितेऽणुरिति ।।२५।।

क्रियतामिति तैः समीरिते सुविमृश्यागमशासनं मुहुः ।
अथ विश्वजनावबोधकं वचनं चागमिकं निवेदयेत् ।।२६।।

अथ तैः विप्रैः आगमशासनम् आगमानां नियोगं विमृश्य मुहुर्मुहुः क्रियतामिति निस्सन्दिग्धं समीरिते सत्यथ विश्वजनावबोधकं सामान्यजनप्रबोधकम् आकमिकम् आकमोक्तं वचनं च निवेदयेत् ।।२६।।

Shripuram Publications
www.shripuram.org

विवरणम्

विद्वत्सम्मत्यनन्तरं लौकिकसम्मतिमाह - **अथ विश्चजनावबोधक-मिति।।२६।।**

यथैव देवपूजायां विनियुक्तमनिन्दितम्।
द्रव्यं पुष्पादिकं पश्चान्निर्माल्यमिति निन्द्यते।।२७।।

एवं बिम्बमदुष्टं यत् पूजायां विनियुज्यते।
तदेव दूषितं पश्चान्निर्माल्यमिति निन्द्यते।।२८।।

तस्माद् दुष्टमिदं बिम्बं भवद्भिर्मुक्तसंशयैः।
निर्मालेयबुद्ध्या त्यक्तव्यमिति शास्त्रस्य शासनम्।।२९।।

इति।।

विमर्शिनी

तान्याह- यथैव देवपूजायामित्यादि।।२७-२९।।

संवावदूकेषु जनेषु कर्तॄन् कियन्तमित्याद्यणुनानुयुज्य।
कालावधिं तद्गतदेवताभ्यो देवाय चैवं विनिवेदयेच्च।।३०।।

विमर्शिनी

संवावदुकेषु तस्मिन् कर्मणि संवदनशीलेषु जनेषु सत्सु कर्तॄन् प्रति 'कियन्तं कालम्' इत्याद्यणुना कालावधिमनुयुज्य पृष्ट्वा तद्गतदेवताभ्यः तत्क्षेत्रस्थितदेवताभ्यः एवं 'श्रृण्वन्तु' इत्याद्यणुना, देवाय 'भगवन् वास्त्वभिनवम्' इत्यादिना च निवेदयेत्।।३०।।

विवरणम्

अथ कालपरिमाणावधारणमाह- संवावदूकेष्विति। परिवारानुज्ञापनमिदानीमपि कार्यम्।।३०।।

Shripuram Publications
www.shripuram.org

कियन्तं कानमत्रेशः प्रवासवसतिं वसेत्।
मासादूर्ध्वं द्वादशाब्दादर्वाक् कालावधिः स्मृतः॥३९॥

नार्वागूर्ध्वं क्लेशवासं वासुदेवोऽनुमन्यते॥

श्रृण्वन्तु देवताः सर्वाः प्रासादमिमाश्रिताः।
यदुच्यमानमस्माभिरनुगृह्णन्तु तेन नः॥३२॥

पूर्वैः पूर्वं कृतमिदं देवालयमसारवत्।
प्राप्तं कालवशाद् भूयो वयं तत् कर्तुमुद्यताः॥३३॥

कालेनैतावता भूयः प्रासादेऽस्मिन् पूनर्नवे।
[1]स्थापयामो वयं सत्यं तदनुज्ञातुमर्हथ॥३४॥

भगवन्! वास्त्वभिनवं बिम्बं वा तव शोभनम्।
कारयिष्यन्ति ते भक्तास्तदनुज्ञातुमर्हसि॥३५॥

क्लेशवासस्त्वया देव! रोचनीयोऽल्पके गृहे।
यावन्नवं शुभं कृत्वा पुनः संस्थापयामहे॥३६॥

जीर्णं बिम्बमिदं देव! सर्वदोषावहं नृणाम्।
अस्योद्धारे कृते शान्तिरित्येवं भाषितं त्वया॥३७॥

तत् त्वयाधिष्टितं देव! उद्धरामि तवाज्ञया।
तदुपक्रान्तमस्माभिस्तदनुज्ञातुमर्हसि॥३८॥

इति॥

विमर्शिनी

त्रिविधं मन्त्रं पठति- कियन्तामित्यादि॥३९-३८॥

विवरणम्

इदानीं देवानुमतिमाह- भगवन्निति॥३५॥

१.'प्रा' क. पाठः।

Shripuram Publications
www.shripuram.org

एते तु विष्णुविषये प्रायो[1] मन्त्राः परेष्वमी।
कार्याः स्वस्वागमाद्याप्तस्वविशेषपदान्विताः।।३९।।

एते तु मन्त्राः प्रायो (विष्णु)विषये भवन्ति। परेषु देवेष्वमी मन्त्राः स्वस्वागमाद्याप्तस्वविशेषपदान्विताः स्वेषु स्वेष्वागमेषूक्तस्वस्वविशेषशब्देनान्विताः (कार्याः)। तत्र तत्र शिवादिदेवप्रासादबिम्बादीनां शब्दा यथायोगं योजनीया इत्यर्थः।।३९।।

देवं समिष्टसरसीरुहमात्रपीठे
सङ्कल्प्य सन्निहितमप्ययतत्त्वतारैः।
उद्व्याप्य तत्त्वकलशेन ततोऽभिषिच्यो-
द्व्याप्य प्रकल्पयतु केवलचिन्मयं तम्।।४०।।

विमर्शिनी

पुनरन्तर्गत्वा समिष्टसरसीरुहमात्रपीठे केवलं 'पद्माय नमः' इत्येव पूजिते पीठे देवं सन्निहितं सङ्कल्प्य अप्ययतत्त्वतारैः प्रतिलोमतत्त्वैर्मूलेन प्रणवेन चोद्व्याप्य संहारक्रमेण त्रिर्व्यापय्य ततस्तत्त्वकलशेन तैरेव मन्त्रैरभिषिच्य तैरेवोद्व्यप्य तं केवलचिन्मयं प्रकल्पयतु।।४०।।

विवरणम्

लब्धानुमतेस्तत्त्वकलशाभिषेकमाह-देवमिति। सन्निहितं संकल्प्येत्यावाहनमुक्तम्। अप्ययतत्त्वतारैरुद्व्यप्येति। संहारक्रमेण पठितैस्सर्वैरपि तत्त्वैरन्ते प्रणवेन च प्राग्वत् संहारव्यापकं कृत्वेत्यर्थः। ततस्तत्त्वकलशेनाभिषिच्येति। संहारक्रमेण सर्वे मन्त्रा जप्याः।।४०।।

अग्रे निषद्य प्रणवेन नाडीयुक्त्यैत्य देवाभिदया स्थितः सन्।
सजाग्रदाद्यात्मदशादिभिन्नहारालयाद्यात्मदलाग्रकाद्यम्।।४१।।

ध्यात्वा क्रमात् क्षेत्रमिदं गृहार्चा-
हृदम्बुरुट्कर्णिकमब्जयुग्मम्।
तारेण तेजस्तडिदाभमन्त-

१.'मन्त्राः प्रायः प' ख. पाठः।

Shripuram Publications
www.shripuram.org

रास्तूपिकं व्याप्य च मूलचक्रात्॥४२॥

विकीर्य पुष्पाञ्जलिमादिनाथ प्लुतेन विष्वग् विषुवत्सरण्या।
प्रसार्य संव्याप्तमिदं बहिष्ठप्राकारनिष्ठं परिकल्प्य तेन॥४३॥

ग्रस्तं समस्तं परिवारजातं जालेन मीनानिव संविभाव्य।
पुष्पाञ्जलिं संहृतिमुद्रयात्र कुर्वन् समाहृत्य ततः क्रमेण॥४४॥

सप्तोर्मिपञ्चाम्बुधिमात्रतारै-
रामध्यहारापदमान्तहारम्।
आनीय चान्तर्गतमण्डलान्तं
प्रासादनिष्ठं च नयेत् दशाभिः॥४५॥

विमर्शिनी

ततो ध्यानसङ्कोचनमाह-अग्रे निषद्येति। देवस्याग्रे निषद्य नाडीयुक्त्या नाडीयोगेन एत्य देवं मनसा गत्वा प्रणवेन देवाभिदया देवेनैकीभूतः स्थितः सन् इदं क्षेत्रं महामर्यादापर्यन्तं स्थानमब्जयुग्मं ध्यात्वा। कथमित्याकाङ्क्षायामाह-सजाग्रदाद्येत्यादि। सजाग्रदाद्यात्म-दशादिभिन्नहारालयाद्यात्मदलाग्रकाद्यं जाग्रदाद्याः जाग्रत्स्वप्नसुषुप्तितुरीयाख्या दशाः अवस्थाः ताभिः सहिताः सजाग्रदाद्याः तत्स्वरूपाः सजाग्रदाद्यात्मानः तत्स्वरूपैरवस्थादिभिरन्यैश्च चतुर्विधैर्वर्गैः भिन्नाः संभिन्नाः युक्ताः हारालयाद्याः हाराद्याः आलयाद्याश्च, हाराद्याः बाह्यहारामध्यहारान्तहारान्तर्मण्डलानि आलयाद्याः प्रासादगर्भगृहपीठप्रतिमाश्च, हारालयाद्यात्मानो हारालयाद्यस्वरूपाः ते दलाग्रकाद्या ययोरब्जयोः, दलाग्रकाद्याः दलाग्रदलदलसन्धिकेसराः, तदब्जद्वयं गृहार्चाः हृदम्बुरुट्कर्णिकं क्रमात् प्रासादकर्णिकं प्रतिमाहृदयकर्णिकं च एवं पद्मद्वयं ध्यात्वा, अन्तः सुषुम्नायां मूलचक्रात् मूलाधारादारभ्य आस्तूपिकं द्वादशान्तात्मस्तूपिकाग्रपर्यन्तं तडिदाभं विद्युदाकारं तेजः तारेण प्लुतप्रणवेन व्याप्य व्यापय्य, अथ प्लुतेनादिना प्रणवेन पुष्पाञ्जलिं विकीर्य विषुवत्सरण्या सुषुम्नानाड्या संव्याप्तमिदं तेजः विष्वक् परितः प्रसार्य, इदं बहिष्ठप्राकारनिष्ठं महामर्यादापर्यन्तं संव्याप्तं परिकल्प्य, तेन तेजसा समस्तं परिवारजातं परिवारसमूहं जालेन मीनानिव ग्रस्तं कबलीकृतं संविभाव्य, संहृतिमुद्रया पुष्पाञ्जलिं कुर्वन्, ततः तस्मात् तस्मादवधेस्तत्र

Shripuram Publications
www.shripuram.org

तत्र स्थाने क्रमेण समाहृत्य संहृत्य संहारक्रमे विशेषं दर्शयति-सप्तेति। सप्तोर्मिपञ्चाम्बुधि-मात्रतारैः सप्तषट्पञ्चचतुर्मात्रप्रणवैः आमध्यहारापदं मध्यहारापर्यन्तम् आन्तहारम् अन्तहारापर्यन्तम् अन्तर्गतमण्डलान्तम् अष्टमूर्तिनिलयपर्यन्तं प्रासादनिष्ठं चानीय, दशाभिरवस्थाभिः सह परिवारान् नयेत् प्रापयेत्। तत्र सप्तमात्रप्रणवेन संहृतिमुद्रया पुष्पाञ्जलिं कुर्वन् महामर्यादाया आरभ्य मध्यहारापर्यन्तं स्थितान् परिवारांस्तेजसा संगृह्य जाग्रदवस्थया सहानीय तत्पर्यन्तमानयेत्[१]। तथा तस्मात् षण्मात्रप्रणवेन पुष्पाञ्जलिं कुर्वन् स्वप्नावस्थया सह अन्तहारापर्यन्तं च, तथा पञ्चमात्रप्रणवचतुर्मात्रप्रणवाभ्यां च अन्तर्मण्डलान्तं प्रासादपर्यन्तं च क्रमेणानयेत्।।४१-४५।।

विवरणम्

समाधिसङ्कोचनमाह-अग्रे निषद्येत्यादिना। देवस्याग्रतो बद्धपद्मासन उपविश्यात्मनो देवस्य च नाडीसन्धानं कृत्वा नाडीसरण्या देवस्यान्तर्गत्वा देवाभेदेन स्थितो भूत्वेदं क्षेत्रमब्जयुग्मं ध्यायेत्। जाग्रदादय आत्मानः स्वरूपाणि यासां ताः जाग्रदाद्यात्मानो दशाः ताभिः सह वर्तत इति सजाग्रदाद्यात्मदशाः। आदिः प्रणवः तेन भिन्ना हारालयादयः बाह्यहारादयः प्रासादादयश्च आत्मानो यस्य तादृशं दलाग्रकाद्यं यस्याब्जयुग्मस्य तत्तथोक्तम्।।४१।।

गृहं प्रासादः अर्चाया हृद्म्बुरुट् हृदयपुण्डरीकं ते कर्णिके यस्येति समासः। बाह्यकमलस्य तावत् बाह्यहारा दलाग्रं मध्यहारा दलसन्धिरन्तहारा दलान्यन्तर्मण्डलं केसराः ते च जाग्रत्स्वप्नसुषुप्तितुरीयावस्थास्थाना[२]नि प्रासादः कर्णिका आभ्यन्तरस्य तु प्रासादो गर्भगृहं पीठं बिम्बं च तथा भवन्ति। बिम्बगतं हृदयं कर्णिका। हृदयमपि पुनस्तृतीयं कमलमित्यर्थः। तारेण तेजः मूलचक्रात् आस्तूपिकमन्तर्व्याप्येत्यन्वयः। देवस्य मूलाधारादारभ्य सुषुम्नामार्गेणोर्ध्वं प्रसरत् प्रासादलक्षणस्थूलशरीरशिवात्मक-स्तूपिकाग्रपर्यन्तं विद्युन्मालासङ्काशमविच्छिन्नं चैतन्यलक्षणं तेजः स्मृत्वेत्यर्थः।।४२।।

विषुवत्सरणिः सैव मध्यमनाडी ततः प्लुतं प्रणवमुच्चरन्नास्तूपिकाग्रात् तदेव तेजो विषूचीनतया द्वितीयपद्मदलाग्रपर्यन्तं परितः प्रसारयन् कुसुमनिकरं परितो विकिरेत्। ततस्तेन सर्वान्तरेण तेजसा क्षेत्रविभागाष्टकनिविष्टसमस्तदेवतानां अन्तर्बहिर्व्याप्नुवता

१.'त्।। पुनः त्रिव्द्ये' क. ग. पाठः। १.'नं प्रा'।

Shripuram Publications
www.shripuram.org

तदेव समस्तं देवताजातम् उपसङ्ग्रहशक्त्या ग्रस्तमनुसन्दधीत।।४३, ४४।।

समाहरणप्रकारं विवृणोति-सप्तोर्मीति। षडूर्मयः दशाभिः स्थूलजाग्रदादि-चतुरवस्थाभिः सहेत्यर्थः।।४५।।

त्रिद्व्येकमात्रप्रणवैर्नयेत् त-
दागर्भमापीठमथाणुबिम्बम्।
आकृष्य बिम्बात् तदपीतितत्त्व-
तारैश्चिदात्मन्यखिलं तदन्तः।।४६।।

विमर्शिनी

पुनः त्रिद्व्येकमात्रप्रणवैः त्रिमात्रप्रणवेन प्रासादाद् आगर्भं गर्भगृहपर्यन्तं, द्विमात्रप्रणवेन तस्माद् आपीठं पीठपर्यन्तम्, एकमात्रप्रणवेन तस्माद् आणुबिम्बं मन्त्रबिम्बपर्यन्तं चावस्थाभिः सहाकृष्य कबलीकृतपरिवारं तत् तेजो नयेत्। पुनर्बिम्बाद् अपीतितत्त्वतारैः प्रतिलोमतत्त्वैस्तारेण च तदखिलं तेजोभूतं तदन्तः बिम्बस्यान्तर्ग(त?ते) चिदात्मनि चैतन्यमये नयेत्।।४६।।

विवरणम्

आणुबिम्बमिति छेदः। तदखिलमपीतितत्त्वं तारैराकृष्य तदन्तश्चिदात्मनीत्यन्वयः। नयेदित्यनुषज्यते। संहारक्रमेण तत्त्वैरन्ते प्रणवेन च संहारमुद्रया पुष्पाञ्जलिं कुर्वन् बिम्बाविष्टं तत्सर्वं तदीयहृदयकमलवर्तिनि जीवलक्षणे तेजस्युपसंहरेदित्यर्थः।।४६।।

तत्कर्मकालप्रतिबोधनान्ते तत्रोपविष्टः सुसमाहितात्मा।
समाधिसङ्कोचनमुक्तनीत्या निर्वर्त्य तस्मिन् सकलं सुयोज्य।।४७।।

तद्[1] बिम्बकुम्भावपृथक् पृथक् च
व्याप्याभिषिच्याप्ययतत्त्वतारैः।
तत्तत्त्वकुम्भेन पुनश्च तैस्तद्[2]
व्याप्याहरेद् वा प्रतिमाहृदब्जे।।४८।।

१.'त् कुम्भबिम्बाव' क. पाठः। २.'तद्वद्' ख., 'तैश्चोह्याप्या' ग. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

तत्र क्रियाक्रमे पक्षभेदं दर्शयति-तत्कर्मेति। तत्कर्मकालप्रतिबोधनान्ते तस्य कर्मणस्तस्य कालस्य च देवं प्रति विज्ञापनानन्तरं तत्र बिम्बाग्रतः उपविष्टः सुसमाहितात्मा सुतरां समाहितमना भूत्वा उक्तनीत्या उक्तमार्गेण समाधिसंकोचनं ध्यानसंकोचनं निर्वर्त्य कृत्वा तस्मिन् तत् सकलं परिवारतत्त्वादिकं सुयोज्य सुतरां योजयित्वा बिम्बकुम्भौ बिम्बतत्त्वकलशौ अपृथक् ऐकात्म्येन पृथक् च व्यस्तात्मतया च प्रणवेन व्याप्य अप्ययतत्त्वतारैः प्रतिलोमतत्त्वैस्तारेण तत्तत्त्वकुम्भेनाभिषिच्य पुनश्च तैस्तत्त्वतारैः प्रातिलोम्येन व्याप्य तत्तेजः (प्रतिमाहृदब्जे) आहरेद्वा।।४७, ४८।।

विवरणम्

प्रकारान्तरमाह-तत्कर्मेति। तयोः कर्मकालयोः प्र(ति)बोधनं 'भगवन् वास्त्वभिनवम्' इत्येतत् तदनन्तरमेव समाधिसंकोचनेन कृत्स्नां विभूतिं बिम्बं उपसंहृतं विभाव्य यथोक्तं तत्त्वकलशाभिषेकं कृत्वा बिम्ब उपसंहृतं प्राग्वद् हृत्पुण्डरीकपुटे संहृतं भावयेत्।।४७, ४८।।

तत्तद्विभूत्या बहिरङ्गतोऽन्त-
रङ्गादपीतिक्रमतो विकृष्य।
संयोज्य बिम्बस्थचिदात्मनीमं[1]
चिन्मात्रमाकल्प्य निरेतु चातः।।४९।।

विमर्शिनी

इतिक्रमतः पक्षयोरन्यतरक्रमेण बहिरङ्गात् प्राकारादिप्रासादपर्यन्ताद् अन्तरङ्गात् प्रासादादिप्रतिमाहृदयान्ताच्च तत्तद्विभूत्या तत्तदैश्वर्यांशेन सह विकृष्य आकृष्य बिम्बस्थचिदात्मनि बिम्बहृत्कमलस्थचैतन्ये संयोज्य इमं देवं चिन्मात्रमाकल्प्य अतः अस्मात् स्वयं निरेतु निर्गच्छतु पृथग्भूतो भवतु।।४९।।

विवरणम्

तत्तद्विभूत्येत्युपसंहारः।।४९।।

१.'मं प्रकल्पयेत् केवलमात्मरूपम्।।' ख. पाठः।

Shripuram Publications
www.shripuram.org

कृत्वाग्रतः स्वस्तिकक्लृप्तशालीदर्भाग्रकूर्चेऽर्चितयोगपीठे।
सुसंस्कृतं लोहमयं सकूर्चं घटं सदूर्वाक्षतकाञ्चनाद्यम्।।५०।।
आपूरितं पूत[1]जलेन सावकाशं समिष्टार्णसरोरुहाद्यम्।
सम्प्रार्थ्य[2] देवं मनुबिम्बके तत्सम्पातयुग्मं प्रसमर्पयेच्च।।५१।।

विमर्शिनी

पुनरग्रतो देवस्याग्रभागे स्वस्तिकक्लृप्तशालीदर्भाग्रकूर्चे स्वस्तिकादिभिः क्लृप्ते पीठे अर्चितयोगपीठे तत्र सुसंस्कृतं यथोक्तक्रमेण संस्कृतं लोहमयं घटं कृत्वा सकू(र्चकं? र्चं) कूर्चसहितं सदूर्वाक्षतकाञ्चनाद्यं दूर्वाक्षतकाञ्चननवरत्नादिसनाथं च कृत्वा पूतजलेन गालनतीर्थाद्यर्चनेन च शुद्धजले[3]न मानसपूरणानन्तरं सावकाशमूर्ध्वार्धपर्यन्तं पूरितं च कृत्वा पुनः समिष्टार्णसरोरुहाद्यं संपूजितलिपिपङ्कजं कृतमूर्तिकलावाहनाद्यं च कृत्वा देवं 'नमस्ते सर्वलोकेश' इत्यादिवक्ष्यमाणमन्त्रेण संप्रार्थ्य मनुबिम्बके तत्संपातयुग्मं कनिक्रदत्स्वस्त्यादिहुतजातं वास्तोष्पतिहुताज्जातं च संपातद्वयं प्रसमर्पयेच्च।।५०, ५१।।

विवरणम्

संक्रमणक्रमं दर्शयति-संप्रार्थ्य देवमिति। सम्पातयुग्मं प्राग् रक्षितं यात्राहुतिवास्तोष्पतिहोमसम्पातम्। प्रसमर्पणं हृदये कार्यम्।।५१।।

स्थूलं च सूक्ष्मं च परं च रूप-
मावाहयेद् व्युत्क्रमतो[4]ऽणुबिम्बात्।
सर्वत्र गायत्र्यणुमूलतारै-
र्वैतेर्जिनार्णांशकृतोपचारैः।।५२।।
हरौ वसुद्वादशवर्णतारैः
षडर्णनादप्रणवैर्हरे च।
आवाहयेद् वेति पृथक् स्वमूल-
न्यासान्तमाधाय यजेच्च किञ्चित्[5]।।५३।।

१.'शुद्धज' ख. पाठः। २.'र्थ्यमेव' ग. पाठः। ३.'न शुद्धेन मा' क. ग. पाठः। ४.'तश्च बि' इति मूलकोशपाठः। ५.'त्।।
प्रणवाद्यन्तरुद्धैस्तु बिन्दुनादान्तदीपितैः।
पञ्चब्रह्माभिर्वेशेऽत्रावाहनविधिं नयेत्।।
य' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

ततः सर्वत्र देवेषु गायत्र्यणुमूलतारैः स्वस्वगायत्र्या स्वस्वमूलेन तारेण च क्रमात् स्थूलं सूक्ष्मं परं च रूपमणुबिम्बाद् व्युत्क्रमतः उद्वासनारूपेण कलशे आवाहयेत्। जिनार्णांशकृतोपचारैः स्थूलावाहने गायत्रीस्थाने स्वस्वोपचारैर्वा हरौ वसुद्वादशवर्णतारैः अष्टाक्षरद्वादशाक्षरप्रणवैर्वा हरे षडर्णनादप्रणवैः षडक्षरप्रासादप्रणवैर्वा इति स्थूलसूक्ष्मपराणि रूपाणि चावाहयेत्। पृथक् पृथक् स्वमूलन्यासान्त स्वस्वमूलमन्त्रन्यासपश्चिमं कर्माधाय किञ्चित् किञ्चित् स्वमूलेन यजेच्च।।५२, ५३।।

विवरणम्

व्युत्क्रमतश्चेति। पूर्वं क्रमेण पुन(स्त?स्तू)त्क्रमेणेत्यर्थः। जिनार्णांशकृतोपचारैरेतैर्वेत्यन्वयः।।५२।।

नादः प्रासादः। इति शब्दः क्रमोत्क्रमपरामर्शार्थः। पृथगिति तत्तदावाहनानन्तरम्।।५३।।

यथापुरं वारि दरे प्रपूर्य तेन स्वमूलाणुसमर्चितेन।
तत्त्वान्युदित्वा हृदयारविन्दाद्धुतक्रमेणाणुपराणि पञ्च।।५४।।

द्विधापि तान्यन्वितचेतनानि
नीत्वा कमप्यात्मपदं पदादेः।
आवाह्य तस्मात् कलशस्थमूर्तौ
संयोज्य सर्वं विधिवद् विदध्यात्।।५५।।

प्रणवाद्यन्तरुद्धैस्तु बिन्दुनादान्तदीपितैः।
पञ्चब्रह्मभिरेवेशेऽत्रावाहनविधिं नयेत्।।५६।।

प्राणाणुविन्यासविवर्जमात्महृत्पङ्कजान्मन्त्रमहोऽभिवाह्य।
साङ्गीक्रियाद्यं प्रविधाय किञ्चिदिष्ट्वा निवेद्य प्रधिनोतु देवम्।।५७।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

जीवोद्वासनप्रकारस्तु गुरूपदेशादेव ग्राह्य इति मत्वा तस्य सूत्रमात्रं प्रकाशयति- यथापुरमिति। यथापुरं यथा पुरा जीवावाहनकाले तथा वारि जलं दरे शङ्खे प्रपूर्य स्वमूलाणुसमर्चितेन तेन जलेन प्रतिमाया हृदयारविन्दाद् आवाह्य कलशस्थमूर्तौ संयोज्य प्राणाणुविन्यासविवर्जं प्राणन्यासं मुक्त्वा सर्वं कर्म विधिवद् विदध्यादिति योजना। हुतक्रमेणेति तत्त्वहोमक्रमेण क्षेत्रपालादिकं निर्माल्यधार्यादिकं चोदित्वा उक्त्वा। तत्त्वानि सर्वाणि तत्त्वानि त्वणुपराणि अणुर्मूलं परे ऊर्ध्वे भवन्ति येषां तान्यणुपराणि। अणोः पराण्यप्यणुपराणि। मूलपुटितपञ्चतत्त्वान्युदित्वेत्यर्थः। तान्यपि द्विधा च सृष्टिसंहारक्रमेण अन्वितचेतनानि। प्राणापानेत्यादिमन्त्रशेषः सूचितः। कं जलं पदादेः पादद्वयमारभ्य। पदादेरित्यनेनैव पादयोरादिरिति मूलाधारोऽप्युक्तः। तस्मादात्मपदं नीत्वा[1]। आ आत्मपदं द्वादशान्तरस्थपरमात्मपदपर्यन्तं नीत्वेत्यर्थः। मूलाधारहृदयभ्रूमध्यान्यप्यात्मपदान्येवेति त्रिस्थानादप्यावाहनं सूचितम्। ईशे तु अत्र कर्मणि बिन्दुनादान्तदीपितैः बिन्दुना नादेन तदन्ताभ्यां शक्तिशान्ताभ्यां च दीपितैः प्रकाशितैः एवंभूतैः प्रणवाद्यन्तरुद्धैः प्रणवैराद्यन्तरुद्धैः पञ्चब्रह्मभिरेव पञ्चब्रह्मसहितैः पञ्चतत्त्वैरेवावाहनविधिं नयेत्। तत आत्महृत्पङ्कजात् स्वहृदयपद्मात् मन्त्रमहः मन्त्रमयं तेजः भ्रूलत आवाह्य साङ्गीक्रियाद्यं सकलोपकरणाद्यं प्रविधाय किञ्चिदिष्ट्वा निवेद्य तत्रस्थं देवं प्रधिनोतु प्रीणातु।।५४-५७।।

विवरणम्

दरे यथापुरं वारि प्रपूर्य तस्मादावाह्य तेन कलशस्[2]थमूर्तौ संयोज्येत्यन्वयः। कलशोक्तन्यायेन शङ्खे जलं संस्कृत्य बिम्बात् जीवं तस्मिन्नावाह्य तेन वारिणा तज्जीवं कलशस्थितायां मूर्तौ संक्रामयेदित्यर्थः। स्वमूलाणुस[3]मर्चितेनेति पूरणानन्तरं मूलने पूजनमुक्तम्। आहृदयारविन्दात् इत्याकारः प्रश्लिष्टो द्रष्टव्यः।

पदादेराहृदयारविन्दात् कं नीत्वेत्यन्वयः। कं मूलसमर्चितं तच्छङ्खस्थं जलं हुतक्रमेण, तत्त्वान्युदित्वेति हृत्पर्यन्तोन्नयने जप उक्तः। तानि पञ्च तत्त्वान्यणुपराण्यन्वित-चेतनानि द्विधापीत्यन्वयः तानीति हुतक्रमविशेषणार्थः। अपिशब्द उदित्वेत्यनुकर्षणार्थः। अणुर्मूलमन्त्रः तस्मात्पराण्यणुपराणि अणुः परो येषां तान्यप्यणुपराणि। मूलमन्त्रपुटितानीति

१.'त्वा। आत्म' ङ. च. पाठः। २.'स्व' ३. 'र्पि' क. पाठः।

Shripuram Publications
www.shripuram.org

यावत्। अन्वितचेतनानि जीवतत्त्वसहितानि द्विधा सृष्टिमार्गेण संहारमार्गेण च हृदयपुटस्थे जले सत्येवं पञ्चतत्त्वानि वदेदित्यभिप्रायः। आत्मपदमपीत्यन्वयः। ततो द्वादशान्तपर्यन्तमपि सुषुम्नामार्गेण नीत्वेत्यर्थः। पुनस्तस्मादावाह्येति सम्बन्धनीयम्।।५४, ५५।।

प्राणाणुविन्यासविवर्जं सर्वं विधिवद्विधायेत्यन्वयः।।५६।।

सुवाससाच्छाद्य सदर्भदाम्ना
समर्प्य यात्राहुतिजाज्यशेषम्।
उत्थाप्य चोत्तिष्ठमनुप्रजापी
सोष्णीषमूर्धोद्धृतजीवकुम्भः।।५८।।

निर्गत्य पर्येत्य च शाकुनाद्यैः प्रासादमेतल्लघुमण्डपं च।
अन्तर्यथाविध्युपनीय शय्यामारोप्य मूलेन समर्च्य रक्षेत्[1]।।५९।।

विमर्शिनी

पुनः सुवाससा अहतवस्त्रेण सदर्भदाम्ना दर्भदामयुक्तेनाच्छांद्य यात्राहुतिजाज्यशेषं कनिक्रदादिहुतसंपातशेषं समर्प्य उत्तिष्ठमनुप्रजापी कलशमुत्थाप्य सोष्णीषमूर्धा उष्णीषबन्धमूर्धा भूत्वा उद्धृतजीवकुम्भं शिरस्यधिरोप्य तस्मान्निर्गत्य शाकुनाद्यैः कनिक्रदत्स्वस्त्यादि जपन् प्रासादं पर्येत्य प्रदक्षिणीकृत्य एतल्लघुमण्डपम् अल्पमण्डपं च पर्येत्य मण्डपस्य प्रधानद्वारेण यथाविधि अर्घ्यदानपूर्वम् अन्तरुपनीय शय्यामारोप्य मूलेन समर्च्य रक्षेत्।।५८, ५९।।

विवरणम्

शाकुनाद्यैर्निर्गत्य प्रासादमेतल्लघुमण्डपं च पर्यो(त्यो)त्यन्वयः। यथाविध्यन्तरुपनीयेति। मूलबिम्बोदितन्यायपरिग्रहार्थः।।५९।।

बिम्बोद्धारविधौ सशान्तिकलशं कृत्वाग्रतः पावकं
सावित्र्याष्टसहस्रमत्र जुहुयाद् दूर्वास्त्रिमध्वाप्लुताः।

भूराद्यैरपि वा पयोद्रुसमिधः सम्पातमेतद्घटे
सिञ्चेत् पञ्चभिरष्टशश्च जुहुयात् तत्त्वैः ससम्पातकम्।।६०।।

१.'त्।। अथोज्जि' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ जीर्णस्य बिम्बस्योद्धारविधिमाह-बिम्बोद्धारेति। बिम्बोद्धारविधौ बिम्बत्यागपक्षे प्रासादस्याग्रतः पावकं सशान्तिकलशं कृत्वा पावकं वि[१]धाय तद्दक्षिणे शान्तिदेवस्य कलशं च प्रपूज्य अग्निमुखान्तेऽत्र सावित्र्या मन्त्रेण त्रिमध्वाप्लुताः दूर्वाः अष्टसहस्रं जुहुयात्। भूराद्यैः व्याहृतिभिः पयोद्रुसमिधः पयोद्रुमाणां समिधो वा जुहुयात्। तत्संपातम् एतद्घटे शान्तिकलशे सिञ्चेत्। पुनः पञ्चभिस्तत्त्वैः प्रातिलोम्येन अष्टशश्च ससंपातं घृतं जुहुयात्।।६०।।

संहारक्रमतः स्वतत्त्वमनुभिर्होमे सुक्लृप्तेऽमुना
सिक्त्वा शान्तिघटेन पायसनिवेद्याद्यं प्रकुर्वीत वा।

सिक्त्वा तत्त्वघटेन जीवकलशे प्रोद्वास्य नीत्वा बहि-
र्देव बिम्बसमुद्धृतिं वितनुयाद् वासिच्य शान्त्यम्भसा।।६१।।

विमर्शिनी

अत्र क्रियाक्रमे पक्षभेदमाह-संहारक्रमत इति। तत्त्वहोमकाले संहारक्रमतः स्वतत्त्वमनुभिः होमे सुक्लृप्ते सति अमुना शान्तिघटेन देवं सिक्त्वा पायसनिवेद्याद्यं प्रकुर्वीत वा। तत्त्वघटेन सिक्त्वा जीवकलशे प्रोद्वास्य देवं बहिर्नीत्वा शान्त्यम्भसा आसिच्य बिम्बसमुद्धृतिं वितनुयाद्वा।।६१।।

अथोज्जिहीर्षुः प्रतिमां विशीर्णा-
माचार्यवर्यः प्रणिपत्य देवम्।

विप्रोत्तमैस्तत्र पुरः स्थितः सन्
प्रवाचयेच्छान्तिमनन्यचेताः।।६२।।

विमर्शिनी

अथाचार्यवर्यो विशीर्णां भग्नां प्रतिमामुज्जिहीर्षुरुद्धर्त्तुमिच्छुः विप्रोत्तमैः सह देवं प्रणिपत्य तत्र पुरः स्थितः सन् अनन्यचेताः शान्तिं प्रवाचयेत् शान्तिवाचनं कुर्यात्।।६२।।

१.'नि' ख. घ. ङ. च पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

इदानीमुद्वा(धि?सि)तससूत्रजीवस्य बिम्बस्य प्रतिपत्तिकर्मारभते-अथोज्जिहीर्षुरिति। विशीर्णामित्युद्धारे हेतुः प्रदर्शितः। देवं प्रणिपत्येति। सामान्यसिद्धं देवमित्यर्थः।।६२।।

शान्तिरस्तु शिवं चास्तु पुष्टिरस्तु सुमङ्गलम्।
स्वस्ति चास्तु समृद्ध्यस्तु सर्वेषां सन्तु सम्पदः।।६३।।

गोब्राह्मणेभ्यः क्षत्रेभ्यो विट्छूद्रेभ्यस्तथैव च।
लोकेभ्यः सर्वभूतेभ्यो राज्ञे जनपदाय च।।६४।।

ग्रामाय यजमानाय गुरवेऽस्मै गृहाय च।
बिम्बोद्धारविधेरस्तु साकल्यमिह सर्वदा[१]।।६५।।

इति।

विमर्शिनी

शान्तिवाचनपद्यानि पठति-शान्तिरस्त्विति।।६३-६५।।

गर्भागारमथ प्रविश्य विधिवत् पुण्याहकृत् कौतुकं
बद्ध्वा स्वस्य सकर्तृमूर्तिपजनस्यारक्ष्य सर्वान् गुरुः।
पुष्पैः संहृतिपञ्चतत्त्वहुतसम्पातान्वितैर्वासना-
शक्तिं भास्करमण्डले प्रणवतः प्रोद्वासयेत् तद्गताम्।।६६।।

विमर्शिनी

अथ गुरुः स्वयं गर्भागारं प्रविश्य विधिवत् पुण्याहकृद् भूत्वा सकर्तृमूर्तिपजनस्य यजमानस्य मूर्तिपानां स्वस्य च कौतुकं बद्ध्वा सर्वानारक्ष्य संहृतिपञ्चतत्त्वहुतसम्पातान्वितैः पूर्वं संगृहीतैः पञ्चतत्त्वहोमसंपातैः सहितैः पुष्पैः तद्गतां प्रतिमागतां वासनाशक्तिं प्रणवतो भास्करमण्डले प्रोद्वासयेत्।।६६।।

विवरणम्

आरक्ष्ये[२]त्यस्त्रजपतालत्रयादिकमुक्तम्।।६६।।

१.'दा।। ग'क. ग. पाठः। २.'क्ष्येऽस्त्रजीवता' क पाठः।

Shripuram Publications
www.shripuram.org

उच्छ्वंचस्वेत्यादिकं नासदाद्यं सूक्तं चाप्यातेपितःपूर्वकं च।
पुंसूक्तादीन् मूलमन्त्रादिकं च मन्त्री तत्रावर्तयेन्मूर्तिपालैः॥६७॥

विमर्शिनी

मन्त्री मन्त्रविशेषज्ञो गुरुः तत्रोद्धारकाले मूर्तिपालैः सह 'उच्छ्वं च स्वे'त्यादिकं, 'नासदासीद्' इत्यादिकम्, 'आ ते पितः' पूर्वकं च सूक्तं पुंसूक्तादीन् पुरुषसूक्तादीन् मूलमन्त्रादिकं चावर्तयेत् आवृ[१]त्य जपेत्॥६७॥

सौवर्णलाङ्गलमुखेन विदार्य पीठ-
बन्धं सुबध्य पशुबालकुशादिरज्ज्वा।
प्रोद्धारयेत् सुकलितेन वृषेण बिम्बं
तद्योग्यमन्त्रकृतसावयवीक्रियाद्यः॥६८॥

विमर्शिनी

पुनर्मन्त्री तद्योग्यमन्त्रकृतसावयवीक्रियाद्यः तद्योग्यस्य निर्माल्यधारिणे मन्त्रेण सकलीकृतो भूत्वा पशुबालकुशादिरज्ज्वा पशोर्बालरोमैः कुशादिभिश्च कृतरज्ज्वा सुकलितेन यथावद् बद्धेन वृषेण सौवर्णलाङ्गलमुखेन सुवर्णमयेन लाङ्गलाग्रेण पीठबन्धं विदार्य बिम्बं प्रोद्धारयेत्॥६८॥

विवरणम्

सौवर्णलाङ्गलमुखेनेति। सुवर्णनिर्मितलाङ्गलाग्रेण बिम्बं पीठबन्धविदारणेन बिम्बं चालयित्वा पशुबालरोमकुशदर्भादिविरचितेन पाशेन बिम्बं परिबध्य मूर्तिपैः सह वृषेण कलिततत्पाशेन स्वस्थानात् सम्यगुद्वहेत्। शैवे तु पीठस्याध एव विदारणं कृत्वा पीठं पूर्वमपास्य बिम्बोद्धारः कार्यः। तद्योग्यमन्त्रजपसावयवीक्रियाद्य इति प्रागेव विष्वक्सेनादिमन्त्रसकलीकरणादिकमुक्तम्॥६८॥

पीठिकाबन्धविश्लेषे स्वस्वमूलमनुर्मनुः।
व्याहृतित्रयतारात्मा ततो बिम्बसमुद्धृतौ॥६९॥

---

१. 'वर्त्य ज' ख. घ. ङ पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

पीठिकाबन्धविश्लेषे पीठिकावियोगे स्वस्वमूलमनुर्मनुः स्यात्। बिम्बसमुद्धृतौ व्याहृतित्रयतारात्मा 'भूर्भुवःस्वरोमि'ति मनुः।।६९।।

विवरणम्

पीठबन्धच्छेदे बिम्बोदसने च मन्त्रमाह-पीठिकेति।।६९।।

पीठे याम्यशिरस्कमत्र विनिधाय क्षालयित्वा मना-
गिष्ट्वोद्वास्य च वासनां वसनसंवीतं शिरःपूर्वकम्।
नीत्वा न्यस्य बहिः सदर्भसिकते तद्याम्यदिक्स्थण्डिले
वामीकृत्य तिलाक्षतानि विकिरन् पर्येतु बिम्बं त्रिधा।।७०।।

विमर्शिनी

अत्र पीठे याम्यशिरस्कं दक्षिणशिरसं विनिधाय शाययित्वा क्षालयित्वा मनागीषदिष्ट्वा वासनां च पूर्ववदुद्वास्य वसनसंवीतं[1] वस्त्राच्छादितं[2] तत्[3] शिरःपूर्वकं बहिर्नीत्वा (सदर्भसिकते) तद्याम्यदिकस्थण्डिले प्रासादस्य दक्षिणदिक्स्थमण्डले स्थण्डिलं कृत्वा सिकतादर्भांश्च विन्यस्य तत्र दक्षिणशिरस्कं न्यस्य तिलाक्षतानि विकिरन् वामीकृत्य वामीकारेण त्रिधा बिम्बं पर्येतु।।७०।।

विवरणम्

अत्रेति गर्भगृह एव। शिरःपूर्वकं बहिर्नीत्वा सदर्भसिकते तद्याम्यदिक्स्थण्डिले न्यस्येत्यन्वयः। अत्रापि दक्षिणशिरस्कतया न्यासः। वामीकरणमपसव्यकरणम्। त्रिधा त्रिवार्यकम्।।७०।।

विसृज्य वस्त्राद्यभिषिच्य किञ्चनो-
पहृत्य तत्स्थामपि शेषवासनाम्।
रवौ समुद्वास्य सुवेष्ट्य वाससा
कुशैश्च नद्यादिजलाशयं नयेत्।।७१।।

१, २, ३.'तां' क. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

पुनर्वस्त्रादि विसृज्याभिषिच्य किञ्चनोपहृत्य तत्स्थां शेषवासनामपि रवौ समुद्वास्य वाससा कुशैश्च सुवेष्ट्य नद्यादिजलाशयं नयेत्॥७१॥

तत्रागाधे पाथसि स्विष्टपीठे
विष्वक्सेनाद्यं स्वनिर्माल्यभाजम्।
तन्मन्त्रेणावाह्य सम्पूज्य यज्वा
तत्सात्कृत्य प्रक्षिपेद् बिम्बमप्सु॥७२॥

विमर्शिनी

तत्र यज्वा गुरुरगाधे पाथसि जले स्विष्टपीठे विष्वक्सेनाद्यं [1]स्वं स्वं निर्माल्यभाजं तन्मन्त्रेण तत्तन्मत्रेणावाह्य संपूज्य बिम्बं तत्सात्कृत्य [2]तादात्म्यं कृत्वा अप्सु प्रक्षिपेत्॥७२॥

विवरणम्

तत्सात्कृत्य तदधीनवचने सातिः। विष्वक्सेनादि[3]समर्पितं भावयन्नित्यर्थः॥७२॥

स्नात्वात्र कर्त्रा सह तर्पयेच्च स्वमूलमन्त्रेण यथाविधानम्।
प्राचीनपीठाद्यपनीय मूलवेश्माभिरक्ष्यारचयेच्च सर्वम्॥७३॥

विमर्शिनी

अत्र कर्त्रा सह स्नात्वा स्वमूलमन्त्रेण यथाविधानं तर्पयेच्च। पुनरागत्य प्राचीनपीठादि निर्माल्यभूतं पीठनपुंसकशिलाद्यमपनीय मूलवेश्म मूलप्रासादमभिरक्ष्य सर्वं कर्मारचयेत्॥७३॥

विवरणम्

प्राचीनपीठाद्यपनीयेति। पुराणं पीठं नपुंसकशिलां च॥७३॥

अथाधिवास्योक्तवदल्पबिम्बं
हुत्वा तथाभ्यर्च्य सजीवकुम्भम्।

---

१. 'स्वस्वनि' क. ख पाठः। २. 'त्म्यं तदधीनं कृ' ख., 'त्म्यादधीनं कृ' ङ पाठः। ३.'मर्पकं भा'

www.shripuram.org
Shripuram Publications
www.shripuram.org

समण्डलं तत्परितो बलिं च
कृत्वा प्रसन्नापचितिं च[1] कुर्यात्।।७४।।

विमर्शिनी

अथोक्तवदल्पबिम्बं सजीवकुम्भमधिवास्य तथा पूर्ववदेव हुत्वा समण्डलं सजीवकुम्भमल्पबिम्बगतं देवमभ्यर्च्य तत्परितो मण्डपस्य परितः बलिं च कृत्वा प्रसन्नापचितिं प्रसन्नपूजां च कुर्यात्।।७४।।

विवरणम्

इदानीं जीवकलशस्य शय्यायां निधानं यदुक्तं तच्छेषमाह-अथाधिवास्येति। तथेति मूलबिम्बोक्तकर्मातिदेशः।।७४।।

अथाल्पगेहे सुविशोधितेऽल्पपीठं च संशोध्य तथाधिवास्य।
संरक्ष्य गत्वाभिघटं निषद्य तद्रात्रिशेषं गमयेद् विनिद्रः।।७५।।

विमर्शिनी

अथ सुविशोधिते अल्पगेहेऽल्पपीठं संशोध्य तथाधिवास्य संरक्ष्य मण्डपं गत्वाभिघटं घटाभिमुखं निषद्य विनिद्रस्तद्रात्रिशेषं गमयेत्।।७५।।

विवरणम्

गत्वा अभिघटं निषद्येति। जीवकलशसन्निधिं गत्वा तत्रासीन इत्यर्थः। संरक्ष्येति वस्त्राच्छादनादिकमुक्तम्।।७५।।

कृत्वा विधिं साम्प्रतिकं प्रभावे
नान्दीमुखादिक्रमतोऽल्पगेहे।

पीठं प्रतिष्ठाप्य ततोऽर्चयित्वा
संरक्ष्य तन्मण्डपमभ्युपेत्य।।७६।।

उद्वास्य बिम्बे महितेऽखिलं तन्नीत्वोक्तवद् बिम्बघटक्रमेण।
कृत्वा परावाहनपूजनाद्यं बिम्बं प्रतिष्ठापयतूक्तनीत्या।।७७।।

१.'प्र' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

पुनः प्रभाते साम्प्रतिकं संप्रतियोग्यं विधिं सन्ध्योपासनादिकं कृत्वा नान्दीमुखादिक्रमतः पूर्वक्रमेणाल्पगेहे पीठं प्रतिष्ठाप्यार्चयित्वा संरक्ष्य तन्मण्डपमभ्युपेत्य महिते पूजिते बिम्बेऽखिलमुद्वास्य बिम्बघटक्रमेणोक्तवन्नीत्वा परावाहनपूजनाद्यं कृत्वा उक्तनीत्या बिम्बं प्रतिष्ठापयतु।।७६, ७७।।

विवरणम्

बिम्बघटक्रमेणेति। जीवकलशानयने स्थानमुक्तम्।।७७।।

निद्राघटस्नपनपश्चिममत्र कृत्वा
सम्प्रार्थ्य साधु भगवन्निति सन्नतात्मा।
जीवाभिवाहनविधौ कलशेन तेन
सिञ्चेत् तदर्हमनुविन्यसनं च कुर्यात्।।७८।।

विमर्शिनी

अत्र निद्राघटस्नपनपश्चिमं कर्म कृत्वा साधु सन्नतात्मा भूत्वा 'भगवन्नल्पगेहेऽस्मिन्' इति संप्रार्थ्य जीवाभिवाहनविधौ तेन जीवकलशेन सिञ्चेत्। तदर्हमनुविन्यसनं प्राणन्यासादिकं च कुर्यात्।।७८।।

विवरणम्

तदर्हमनुविन्यसनं च कुर्यादिति। उक्तं हि पुरस्तात् "त्रिस्त्र्यात्मना व्याप्ये"त्यादि।।७८।।

भगवन्नल्पगेहेऽस्मिन् वासः क्लेशोऽपि ते हरे!।
वस्तव्यो भगवंस्तावद् यावद् गेहं समाप्यते।।७९।।

कारकस्य परामृद्धिमनुजानन्महोदयाम्।
भक्तानामनुकम्पार्थमिह त्वं स्थातुमर्हसि।।८०।।

इति।

Shripuram Publications
www.shripuram.org

विमर्शिनी

प्रार्थनामन्त्रं पठति-भगवन्निति।।७९, ८०।।

विवरणम्

भगवन्नित्युक्तं मन्त्रं पठति-भगवन्नल्पगेहेऽस्मिन्निति।।७९, ८०।।

हरौ गेहविधावेवं मनुरन्येष्विहोन्नयेत्।
तत्तद्दैवतबिम्बादिसमीप्सितपदान्वयम्।।८१।।

विमर्शिनी

हरौ गेहविधौ प्रासादनवीकरणे एवं मनुः स्यात्। इहान्येषु देवेषु बिम्बादिषु च तत्तद्दैवतबिम्बादिसमीप्सितपदान्वयं हरे इति स्थाने तत्तद्देवतानां नाम 'यावद् गेहं समाप्यत' इत्यत्र 'यावद् बिम्बं समाप्यत' इत्यादीष्टपदानाम् अन्वयं योजनम् उन्नयेत् ऊहयेत्।।८१।।

स्थूलाभिवाहनपुरस्सरमत्र सर्वं
निर्वर्त्य देवमभिपूज्य चरुं निवेद्य।
दत्त्वा बलिं परिषदां परितोष्य देवं
द्वारं पिधाय गमयेत् त्रिदिनं पुरोवत्।।८२।।

विमर्शिनी

पुनरत्र स्थूलाभिवाहनपुरस्सरं सर्वं कर्म निर्वर्त्य देवमभिबूज्य चरुं निवेद्य परिषदां बलिं दत्त्वा देवं परितोष्य द्वारं पिधाय पुरोवत् त्रिदिनं गमयेत्।।८२।।

चातुर्थिकस्नपनयागमहोत्सवाद्यं
मूलोदितं सकलमत्र समादधीत।
बालालयन्यसनकर्म नपुंसकाश्म-
[1]गेहोपधानरहितं विहितं तदेतत्।।८३।।

विमर्शिनी

चातुर्थिकस्नपनयागमहोत्सवाद्यं चतुर्थदिवसस्नानं यजनमुत्सवाद्यं च मूलोदितं

---

१. 'रत्नोप' क. ख. ग. पाठः।

Shripuram Publications
www.shripuram.org

मूलबिम्बे निर्दिष्टं सकलं कर्मात्रापि समादधीत कुर्यात्। तदेतद् बालालयन्यसनकर्म देवस्य बालालयस्थापनकर्म नपुंसकाश्मगेहोपधानरहितं नपुंसकशिलया प्रासादस्येष्टकादिना च रहितं विहितं स्यात्।।८३।।

विवरणम्

याग (इति) पूजाविशेषं कथयन्निष्क्रमणमुपसंहरति-बालालयेति।।८३।।

तद्बिम्बे रचिते समग्रगुणसम्पन्ने सपीठादिके
प्रत्यासीदति च प्रतिश्रुतमुहूर्ते बीजवापादिकम्।
कृत्वा तत् परिगृह्य कारुकरतो बिम्बं जले वासयेत्
तत्प्रासादविशोधनं च तनुयात् पुण्याहकर्मान्तिमम्।।८४।।

विमर्शिनी

एवं बालालये स्थापितस्य देवस्य मूलप्रासादप्रवेशे विधानमाह-तद्बिम्ब इति। समग्रगुणसम्पन्ने सम्पूर्णगुणयुक्ते सपीठादिके पीठनपुंसकशिलादिभिः सहिते तद्बिम्बे रचिते सति, पूर्वं प्रतिश्रुते प्रतिज्ञाते मुहूर्ते च प्रत्यासीदति समीपं प्राप्ते सति, तत्कालक्लृप्त्या बीजवापादिकं कृत्वा तद्योग्यकाले तद् बिम्बं च कारुकरतः पूर्ववत् परिगृह्य जले वासयेत् अधिवासयेत्। तत्प्रासादविशोधनं च पुण्याहकर्मान्तिमं यथा भवति तथा तनुयात्।।८४।।

विवरणम्

अथ प्रत्यासत्तिं वक्तुमारभते-तद्बिम्ब इति। प्रत्यासत्तिः सन्निधिः प्रतिश्रुतः पुरस्तात् कर्तृभिरनुयुक्तैः प्रतिज्ञातः। बीजवापादिकमिति त्रिषवणपूजोक्षणध्वजादिकमुक्तम्।।८४।।

उद्धृत्योदकतोऽभिषिच्य कलशैः स्वैर्बिम्बमग्राहिते
सम्यक्संस्कृतमण्डपेऽधिशयनं संवेश्य तत्पार्श्वतः।

Shripuram Publications
www.shripuram.org

विन्यस्येत् परिशोधिताल्पनिलयप्राक्स्थापितार्चास्थितं
देवं[1] प्रार्थ्य घटेऽभिवाह्य विधया सूत्रच्छिदासूक्तया।।८५।।

विमर्शिनी

पुनर्बिम्बमुदकत उद्धृत्य स्वैर्बिम्बशुद्धिकलशैरभिषिच्य अग्राहिते मूलप्रासादस्याग्रतः स्थिते सम्यक्संस्कृतमण्डपे अधिशयनं शय्यायां संवेश्याधिवास्य तत्पार्श्वतः तस्याः शय्यायाः पार्श्वे एवं[2] परिशोधिताल्पनिलयप्राक्स्थापितार्चास्थितं परिशोधितेऽल्पप्रासादे पूर्वं स्थापितायामर्चायां स्थितं देवं तत्त्वहोमाद्युपेतं सूत्रच्छिदासूक्तया विधया सूत्रच्छेद उक्तेन विधिना प्रार्थ्य घटे जीवकलशे अभिवाह्यानीय विन्यस्येत्।।८५।।

विवरणम्

स्वैः कलशैः निजनिजकथितैः बिम्बशुद्धिकलशैः। अग्राहिते प्रासादस्याग्रतो विरचिते। इदानीं बालबिम्बजीवसङ्क्रमणादिकमाह-तत्पार्श्वतो विन्यस्येदित्यादिना। सूत्रच्छिदासूक्तया विधया कलशेऽभिवाह्य तत्पार्श्वतो विन्यस्येत् इत्यन्वयः।।८५।।

यात्रां कुरुष्व देवेश! भक्तानामनुकम्पया।
जीर्णमुद्धृत्य तद् भक्तैः कल्पितं बिम्बमुज्ज्वलम्।।८६।।
तेन गेहं विशाद्येश! उत्तिष्ठ शिखिवाहन!।
एवं गुहार्चाविषये मन्त्रोऽन्यत्रोन्नयेद्[3] बुधः।।८७।।

विमर्शिनी

प्रार्थनामन्त्रं पठति-यात्रां कुरुष्वेति। गुहार्चाविषये स्कन्दस्य बिम्बोद्धारे एवं मन्त्रो भवति। अन्यत्र देवेषु प्रासादादिषु च बुधः तत्तद्योग्यपदज्ञो गुरुः स्वस्वपदम् उन्नयेत् ऊहयेत्।।८६, ८७।।

उत्पाट्योक्तवदल्पबिम्बमुपनीयातो बहिः सन्दहेद्
गोसर्पिःस्नपितं तदर्हदहने तद् दारवं चेद् गुरुः।
लौहं चेद् गुरवे समर्पयतु तद् विद्राव्य यज्वाथवा
छित्त्वा नालमिदं विशोध्य सुशुभं तत्कौतुकं कल्पयेत्।।८८।।

---

१. 'वशं कलशेऽभि' ख. पाठः। २. 'वं' क. ख. ग. च. पाठः। ३. 'ह' ग. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

ततः उक्तवत् पूर्वोक्तविधिनाल्पबिम्बमुत्पाट्य अतः तस्माद् बहिरुपनीय तद् दारवं चेत् गोसर्पिःस्नपितं कृत्वा तदर्हदहने अग्नौ निर्माल्यधारिणमावाह्य सम्पूज्य तत्र गुरुः स्वयं सन्दहेत्। तल्लौहं चेत् यज्वा यजमानोऽल्पबिम्बं विद्राव्य लोहमात्रमापाद्य गुरवे समर्पयतु। अथवा नालं छित्त्वा इदं विशोध्य सुशुभं तत्कौतुकं तस्य देवस्यैव कौतुकत्वेन कल्पयेत्।।८८।।

विवरणम्

तद्दारवञ्चेत्तदर्हदहने सन्दहेदिति। निर्माल्यधारिणमग्नौ सन्निधाप्य तदीयमन्त्रतर्पणं कृत्वा[१] तत्सात्कुर्यादित्यर्थः। लौहं चेत्तद्विद्राव्य गुरवे यज्वा समर्पयत्वित्यन्वयः। योनिभेदापेक्षया अयं प्रतिपत्तिभेदः। अथवेत्यादि प्रतिपत्त्यन्तरम्।।८८।।

आधाय प्रतिमाधिवासमधरेद्युस्तत्तदर्हार्हणा-
होमब्राह्मणतर्पणाद्युपरिषट्पीठाधिवासादिकम्।
अन्येद्युः कृतरत्नकर्मणि समानीय प्रतिष्ठाप्य तत्-
पीठे बिम्बमथ स्वकीयकलशासेकादिकं चाचरेत्।।८९।।

विमर्शिनी

अधरेद्युः पूर्वदिवसे तत्तदर्हार्हणाहोमब्राह्मणतर्पणाद्युपरिषट्पीठाधिवासादिकं तत्तद्ध्यानाधिवासपूजाधिवासहोमब्राह्मणपूजनादिकानन्तरं पीठाधिवासादियुक्तं प्रतिमाधिवासमाधाय अन्येद्युरुत्तरदिवसे कृतरत्नकर्मणि कृतरत्नन्यासे तत्पीठे तद्बिम्बमानीय प्रतिष्ठाप्याथ स्वकीयकलशासेकादिकं कुम्भेशनिद्राकलशजीवकलशानामभिषेकं तदाद्यं चाचरेत्।।८९।।

विवरणम्

अथ जीवकलशन्यासशेषमनुसरति-आधायेति। अर्हणा पूजा उपरिषदनन्तर-कर्तव्यम्। अन्येद्युर्मुहूर्त्तदिवसे तद्बिम्बं समानीय कृतरत्नकर्मणि पीठे प्रतिष्ठाप्येत्य-न्वयः।।८९।।

---

१. 'त्वा सा' घ. पाठः।

Shripuram Publications
www.shripuram.org

यत्राह्नैकेन तु समुदितं कर्म निर्मेयमत्र
प्रोद्वास्यैवं कलशमधिवास्यार्चया साकमग्रे।
मूलार्चादिच्युतिनिजविशुद्ध्यादिमन्मूलगेहे
संस्थाप्यैनां स्वचितिकलशासेचनाद्यं च कुर्यात्॥९०॥

विमर्शिनी

उक्त एव निष्क्रामणे विशेषमाह-यत्रेति। यत्रावस्थायामेकेनैवाह्ना समुदितं सम्यगुक्तं कर्म निर्मेयं कर्तुं शक्यं बिम्बमात्रस्यैव चेद् वैकल्यं तत्राप्येवं प्रोद्वास्य कलशं जीवकलशं सर्वलक्षणयुक्तया गृहीतया कृतजलाधिवासाद्यया अर्चया साकमग्रे मण्डपे अधिवास्य मूलार्चादिच्युतिनिजविशुद्ध्यादिमन्मूलगेहे विशीर्णां प्रतिमां पीठादिभिः सह यथोक्तप्रकारेण उद्धृत्य त्यक्त्वा कृतप्रासादशुद्ध्यादिके कृतरत्नन्यासे च तत्र प्रासादे प्रतिमां संस्थाप्य स्वचितिकलशासेचनाद्यं जीवावाहनकाले जीवकलशाभिषेकाद्यं च कुर्यात्॥९०॥

विवरणम्

बालबिम्बनिष्क्रमणमुक्त्वा केवलकलशनिष्क्रमणमाह-यत्राह्नेति। निर्मेयं निर्वर्तनीयम्। अग्रे[1] अग्रतः कृते मण्डपे मूलार्चादिच्युतिर्मूलबिम्बपीठादीनां उक्तक्रमेण परित्यागः निजविशुद्धिः प्रासादशुद्धिरेव स्वचितिकलशो जीवकलशः॥९०॥

बिम्बाजीर्तिविधौ विधाय सकलं सूत्रच्छिदै[2]कोदितं
मुक्त्वा प्रार्थ्य नमस्त इत्यधिघटं संयोज्य निर्याप्य तम्।
मूलार्चां परिरक्ष्य तक्षभिरभीष्टं कर्म निर्माप्य तत्-
कर्मान्ते परिगृह्य कारुकरतः प्रासादमुक्तक्रमात्॥९१॥

पुण्याहावधिभिर्विशोध्य परिकल्प्यार्चिर्मयं तत्स्थितं
बिम्बं वारुणवारिणा सलिलवासे स्नापयित्वा सुधीः।
स्वस्वोक्तक्रमबद्धकौतुकमिदं सम्भाव्य पीठेऽर्चिते
कृत्वा बिम्बघटाभिषेकयजनाद्यं कर्म तत्रैव तत्॥९२॥

१. 'ग्रे तथा कृं' क पाठः। २. 'दै' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org

बिम्बेऽग्राहितमण्डपेऽधिशयनं न्यस्ते च बालालया-
न्नीत्वा जीवघटेऽधिवास्य विधिवन्मूलालयादेव वा।
हुत्वा मण्डप एव जीवकलशे बिम्बे च संस्पृश्य त-
त्सम्पातं पृथगर्चनाद्यमखिलं निर्वर्त्य पूर्वोक्तवत्।।९३।।

रत्नन्यासविधिं विधाय मनसा सम्पूज्य गर्भालयं
नीत्वा जीवघटाद्यमत्र सुविभाव्यैतत्प्रतिष्ठापनम्[1]।
जीवन्यासविधौ स्वजीवकलशेनासिच्य पूर्वोक्तवत्
कुर्यात् कर्मकलापमित्यभिहिता निष्क्रामणप्रक्रिया।।९४।।

विमर्शिनी

बिम्बाजीर्तिविधौ बिम्बस्य वैकल्याभावे प्रासादे जीर्णे सति तस्य चिरकालेनैव कर्तुं शक्यते चेत् तत्रोक्तेषु कर्मसु मध्ये सूत्रच्छिदेकोदितं सूत्रच्छिदमेकमेवोक्तं कर्म मुक्त्वा वर्जयित्वान्यत् सकलं कर्म विधाय उद्वासनात् पूर्वं 'नमस्ते सर्वलोकेश' इति पद्याभ्यां प्रार्थ्य तं देवम् अधिघटं जीवकलशे संयोज्य निर्याप्य बहिर्नीत्वाल्पगृहे स्थापयित्वा मूलार्चां परिरक्ष्य तक्षभिरभीष्टं प्रासादकरणादिकं कर्म निर्माप्य तत्कर्मान्ते कारुकरतः प्रासादं परिगृह्य पुण्याहावधिभिः कर्मभिरुक्तक्रमाद् विशोध्य तत्स्थितं तत्र प्रासादे स्थितं बिम्बं संहृत्यार्चिर्मयमग्निमयं परिकल्प्य सलिलवासे सुधीः जलाधिवासशुद्ध्या वारुणवारिणा स्नापयित्वा स्वस्वोक्तक्रमबद्धकौतुकं स्वस्वकाले स्वस्वमन्त्रेण बद्धकौतुकम् इदं बिम्बम् अर्चिते पीठे सम्भाव्यावाह्य तत्रैव बिम्बघटाभिषेकयजनाद्यं कर्म कृत्वा तत्रैव तद्बिम्बे बालालयान्नीत्वा। मूलालयादिति बिम्बपीठिकादिचलनपरिहारार्थमुक्तम्। निष्क्रामणं क्रियते चेत् तथा सम्भवतीत्यभिप्रायः। अन्यथा चेत् तथा बालालयान्नीत्वा अग्राहितमण्डपे अधिशयनं शय्यायां न्यस्ते जीवघटे च उभयत्र सम्पूज्य विधिवद् अधिवास्य मण्डप एव हुत्वा जीवकलशे बिम्बे च तत्सम्पातं संस्पृश्य अर्चनाद्यम् अखिलं पृथक् पूर्वोक्तवत् निर्वर्त्य पुनः उत्तरदिवसे रत्नन्यासविधिं मनसा विधाय उभयत्र संपूज्य जीवघटाद्यमखिलं गर्भालयं नीत्वा अत्र पीठे एतत्प्रतिष्ठापनं सुविभाव्य मनसा कल्पयित्वा जीवन्यासविधौ (स्व)जीवकलशेनासिच्य पूर्वोक्तवत् कर्मकलापं कुर्यात्। इति निष्क्रामणप्रक्रिया क्रियारीतिरभिहिता।।९१-९४।।

---

१. 'धाप्यैत' क. ग. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

पक्षद्वयेऽपि विषयान्तरमाह-बिम्बाजीर्तिविधाविति। सूत्रच्छिदैकोदितं मुक्त्वा सकलं विधायेत्यन्वयः। 'नमस्ते सर्वलोकेश' इत्ययं मन्त्रोऽवसरे पठिष्यते। अधिघटं जीवकलशे।।९१।।

पुण्याहं वास्तुपुण्याहः। तत्स्थितं बिम्बमर्चिर्मयं[1] परिकल्प्येति जलाधिवासकृते भूतसंहार उक्तः। अर्चिते पीठे सम्भाव्येति। पीठपूजां कृत्वा तस्मिन् विन्यस्तं कल्पयेदित्यर्थः।।९२।।

बिम्बे जीवघटे चाधिवासविधिकृत् इत्यन्वयः। बालालयान्नीत्वा अग्राहितमण्डपे अधिशयनन्यस्ते इति। बालगृहसापेक्षपक्षे विशेषणम्। मूलाल्यादेव वेति। नीत्वेत्याद्यनुषङ्गः। केवलकलशपक्ष एतद्विशेषणम्। पृथगिति। मण्डपे प्रासादे चेत्यर्थः। संपूज्य पीठमिति शेषः।।९३।।

अत्रैतत्प्रतिष्ठापनं सुविभाव्येति। तस्मिन्नर्चिते पीठे तद्बिम्बं प्रागुक्तन्यायेन मनसा प्रतिष्ठापितं भावयेदित्यर्थः। जीवन्यासविधिर्जीवावाहनसमयः इत्यभिहिता निष्क्रामणप्रक्रियेति। चतुर्विधो निष्क्रमणप्रकार उपसंहृतः।।९४।।

नमस्ते सर्वलोकेश! भूतानामभयप्रद!।
भक्तप्रिय! नमस्तेऽस्तु प्रसीद भुवनेश्वर!।।९५।।

आगच्छ देवदेवेश! सर्वकारणकारण!
नवीकरणसिद्[2]ध्यर्थं कुम्भेऽस्मिन् सन्निधिं कुरु।।९६।।

इति।।

विमर्शिनी

प्रार्थनापद्यद्वयं पठति-नमस्त इति।।९५, ९६।।

विवरणम्

सम्प्रति मन्त्रं पठति-नमस्त इति।।९५, ९६।।

---

१. 'ष्ठितं'। २. 'विध्यर्थ' क. घ. पाठः।

Shripuram Publications
www.shripuram.org

निष्क्रामणैकविहितं विधिमत्र मुक्त्वा
शेषं विशेषविदिह प्रविधाय कर्म।
सम्प्रार्थ्य तत्त्वकलशेन तथाभिषिच्य
सङ्कोचमाचरतु वा गृहमात्रजीर्तौ।।९७।।

विमर्शिनी

अत्र गृहमात्रजीर्तौ प्रासादमात्रस्यैव वैकल्ये सति विशेषवित् निष्क्रामणात् संकोचकर्मणि विशेषं विद्वानाचार्यः निष्क्रामणैकविहितं निष्क्रामणप्रधानत्वेन विहितं विधिं मुक्त्वा शेषं कर्म प्रविधाय 'देवेशे'ति संप्रार्थ्य तथा पूर्वोक्तप्रकारेण तत्त्वकलशेनाभिषिच्य संकोचमाचरतु वा। मासादधिकं प्रासादकरणकालश्चेत निष्क्रामणं, ततोऽर्वाक् चेत् संकोच इति विकल्पस्य विभागः।।९७।।

विवरणम्

अथ सङ्कोचनप्रकारं दर्शयति-निष्क्रामणैकविहितमित्यादिना। विशेषविदिति निष्क्रामणात् सङ्कोचविधौ विशेषं विद्वानित्यर्थः। सम्प्रार्थ्येति "नमो ब्रह्मण्यदेवाय" इत्यादिकमुक्तम्। तत्त्वकलशेन तथाभिषिच्येति समाधिसङ्कोचनादिकमुक्तम्। सङ्कोचनं आचरतु वेति वक्ष्यमाणो विशेषोऽभिप्रेतः।।९७।।

देवेश! प्रतिमामूर्ते! मन्त्रमूर्ते[१]! परावरे।
अत्र सङ्कुचितो भूत्वा वासं कुरु तवाज्ञया।।९८।।

इति।।

विमर्शिनी

प्रार्थनामन्त्रं पठति-देवेशेति।।९८।।

विवरणम्

"क्लेशवासस्त्वया देव" इत्येतस्य स्थाने मन्त्रान्तरं पठति-देवेशेति।।९८।।

विष्वग्जागरिते विकृष्य बहिरङ्गादन्तरङ्गादपि
स्वस्मिन्नेव सुयोजिते स्वविभवोन्मेषे चिदेकात्मनि।

---

१. 'र्तौ' ख. पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

ऊर्ध्वाधः क्रमतोऽत्र पद्मयुगलं ध्यात्वा तदावारकं
स्वेच्छाशक्तिविभावितं पृथगतः सम्भाव्य चात्मोद्भिदाम्।।९९।।

[1]तत्राधारसरोरुहाग्रदलमध्यास्योर्ध्वपद्मोदरा-
च्छेश्च्यातद्भिः परितर्प्य देवमुपहारैश्चित्सुधैकात्मकैः।
तस्मादेव तदीयमूर्ध्नि निपतन्तीमाविकासं सुधा-
धारां साधु विभाव्य तन्मुकुलितं कुर्याद् बहिष्ठोऽम्बुजम्।।१००।।

ऊर्ध्वाब्जेन तदम्बुजं कबलितं कृत्वावतार्याथ तत्
संवेष्ट्य त्रिगुणात्मकेन मपरेणारक्ष्य चास्त्रौजसा।
स्वस्मिन् स्वोदितचित्सिराप्रसरविश्रान्त्या स्थितोऽर्चां वृतां
वस्त्राद्यैः परिरक्ष्य तक्षभिरिदं वेश्माञ्जसा कारयेत्।।१०१।।

विमर्शिनी

संकोचनप्रक्रियामाह-विष्वग्जागरित इति। स्वयं देवाभेदेन स्थितो भूत्वा स्वविभवोन्मेषे स्वस्य देवस्य संबन्धिनो विभवस्य व्याप्तेरुन्मेषे प्राकाश्ये विष्वग्जागरिते विष्वङ् महामर्यादापर्यन्तम् उद्बुद्धे तत्र बहिरङ्गादन्तरङ्गाच्च उक्तप्रकारेणैव बाह्यपद्मादन्तःपद्माच्च विकृष्याकृष्य स्वस्मिन्नेव चिदेकात्मनि चैतन्यमात्रे हृत्कमले सुयोजिते सति अत्र स्वेच्छाशक्तिविभावितं स्वस्येच्छाशक्तेरुद्भूतं तदावारकं तस्य चैतन्यात्मनः आवारकम् आच्छादनकरम् ऊर्ध्वाधःक्रमात् पद्मयुगलं ध्यात्वा अतो देवात् पृथग् आत्मोद्भिदां स्वस्य भेदं सम्भाव्य भावयित्वा तत्रानयोः पद्मयोर्मध्ये आधारसरोरुहाग्रदलम् आधारपद्मस्याग्रस्थं दलम् अध्यास्य अस्मिन्नुपविश्य ऊर्ध्वारविन्दो-दरात् श्च्योतद्भिः स्रवद्भिः चित्सुधैकात्मकैः चैतन्यामृतमयैरुपहारैः देवं परितर्प्य संपूज्य प्रसाद्य तस्मादेव ऊर्ध्वपद्मोदरात् आविकासं यावद् विकासो भविष्यति तावत्पर्यन्तं तदीयमूर्ध्नि देवस्य ब्रह्मरन्ध्रे निपतन्तीं सुधाधारां साधु स्वगुरूपदेशक्रमेण विभाव्य स्वयं तस्मादब्जाद् बहिष्ठो भूत्वा तदम्बुजं मुकुलितं[2] कुर्यात्।।९९, १००।।

ऊर्ध्वाब्जेनावतार्य अधोभागं नीत्वा तदम्बुजम् आधाराम्बुजं कबलितं ग्रसितं

१. 'अ' क पाठः। २. 'लीभूतं' ग पाठः।

Shripuram Publications
www.shripuram.org

कृत्वाथ तत् पद्मं त्रिगुणात्मकेन सत्त्वरजस्तमोमयतन्तुरूपेण मपरेण संवेष्ट्य तद्बहिरस्त्रौजसा चारक्ष्य स्वोदितचित्सिराप्रसरविश्रान्त्या स्वस्मादुद्गतस्य सुषुम्नानाड्या मार्गस्य विश्रान्त्या छेदेन हेतुना स्वस्मिन्नेव स्थितो भूत्वा वस्त्राद्यैः वस्त्रदर्भाद्यैः वृतामर्चां परिरक्ष्य इदं वेश्म प्रासादं तक्षभिरञ्जसा यथावत् कारयेत्।।१०१।।

विवरणम्

सङ्कोचनप्रकारमाह-विष्वगिति। बहिरङ्गं बाह्यं पद्मम् अन्तरङ्गमाभ्यन्तरं तत्र विष्वक्समन्ततो जागरितस्तत्तद्व्यापारनिष्ठो यः स्वविभावोन्मेषस्तत्तद्देवतालक्षणः तस्मिन्। उभाभ्यामपि पद्माभ्यां विकृष्य स्वस्मिन् चिदेकात्मनि हृदयकमलपुटगते सुयोजिते सतीत्युक्तानुवादश्शेषविधानार्थः। अत्र ऊर्ध्वाधः क्रमतः पद्मयुगलं ध्यात्वेति। अस्मिन् बिम्बे यदाभायन्तरकमलकर्णिकाभूतं हृदयकमलमधस्तादवस्थितं तस्योपर्यपरमपि[1] कमलं कल्पयेदित्यर्थः। स्वेच्छाशक्तिविभावितं कालात्मनः देवस्यैवेच्छाशक्त्या निर्मितमूर्ध्वं पद्मं हृत्पद्मस्य नित्यकल्पितत्वात् तदावारकं तस्य देवचैतन्यस्य विकासपरिहारायावरणभूतं पद्मयुगलम्। अतः आत्मोद्भिदां सम्भाव्येति। अस्मिन्नवसरे देवाभेदेन स्थितस्य आत्मनः तस्मात् पृथग्भावः कार्यः। निष्क्रमणे तु प्रागेव पृथग्भावो द्रष्टव्यः।।९९।।

अध्यास्य स्वयं पृथग्भूतः सन् तत्रोपविश्येत्यर्थः। श्च्योतनं क्षरणं, तस्मादेवोपरिगतपद्मोदरात् तदम्बुजमधःपद्मं तदम्बुजमूर्ध्वाब्जेन कबलितं कृत्वेत्यन्वयः। अवतार्येति। यथा तदीयदलाग्रमधःपद्ममूले भवति तथाकरणमुक्तम्। मपरः प्रणवः। स्वस्मिन्नात्मनः शरीरे स्वोदितचित्सिराप्रसरविश्रान्तिः स्वस्मात् कालात्मनस्तस्मिन्देवे उदितो यश्चैतन्यांशस्य प्रसरस्तस्य स्वस्मिन्नेवानयनम्।।१००, १०१।।

प्रासादं परिगृह्य तद्विधिसमाप्तौ शोधयित्वाथ तद्-
बिम्बं स्वोदितसप्तशुद्धिहवनस्नानादिना[2] शोधयेत्।

धारायामिह तत्सरोरुहविकासाद्यं विधेयं धिया
प्राक्सङ्ख्योचिततत्त्वसृष्टिहवनादौ कर्मणा चाचरेत्।।१०२।।

---

१. 'तेभ्योप' क पाठः। २. 'चो' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

पुनस्तद्विधिसमाप्तौ प्रासादे कृते सति प्रासादं परिगृह्य शोधयित्वाथ तद्बिम्बं तत्रस्थं बिम्बं स्वोदितसप्तशुद्धिहवनस्नानादिना उक्तैः क्षालनादिसप्तशुद्धिभिः प्रायश्चित्तादिहोमैः उत्तमादिक्रमेणोक्तैः कलशस्नानादिभिश्च शोधयेत्। आदिशब्देन दिशा[1]होमोत्सवादय उक्ताः। इह शोधनसमये धारायामारभ्यमाणायां तत्सरोरुहविकासाद्यं पूर्वोक्तपद्मयोः सङ्कोचापनयनम् ऊर्ध्वाधोनयनं च विधेयं कर्म धियैवाचरेत्। प्राक्संख्योचिततत्त्वसृष्टिहवनादौ पूर्वप्रोक्तसंहारतत्त्वहोमे याभिः संख्याभिः परिच्छिन्नस्तत्त्वहोमः कृतः ततोऽधिकसंख्याभिः परिच्छिन्नेन सृष्टितत्त्वहोमे तत्त्वकलशस्नाने ब्रह्मकलशस्नाने च कर्मणा सङ्कोचविकासादिकमाचरेत्। तत्त्वहोमकलशस्नानादिकमेव पद्मद्वयस्य सङ्कोचविकासादिकर्मेत्यर्थः।।१०२।।

विवरणम्

धारायामिति। सप्तशुद्धिषु धारायामारभ्यमाणायां तस्य मुकुलितस्य पद्मस्य विकासं तच्चैतन्यकृत्स्नाङ्गप्रसरणहेतुभूतं मनसा कार्यम्। अथ तत्त्वहोमादिषु कर्मसु कर्मणा च तत्सर्वं कुर्यात्। चैतन्यस्यापाततः कार्त्स्न्येन च प्रसरणं ध्यानकर्मणोर्विशेषः। प्राक्संख्योचितेति। संहारसमये यावती संख्या परिगृहीता ततोऽधिकाधुना संख्या स्यादित्यभिप्रायः। निष्क्रमणेऽपि समानमेतत्।।१०२।।

जीर्णे सत्यष्टबन्धे तदधिगतचितिं स्वार्हसम्पातसिक्तां
देवे व्याप्यादिना तन्मलमपि परिशोध्याभिषिच्यार्चितेऽस्मिन्।
बीजेनावाह्य पीठे प्रकृतिमपि पुमांसं च मूलेन बिम्बे
साङ्गीकृत्योपहारान् स्नपनसमवसानान् समर्प्योभयोश्च।।१०३।।

पुण्याहप्रोक्षणान्ते द्वयमपि वसनाद्यैर्विभूष्योपहारै-
रिष्ट्वा कृत्वाष्टबन्धं विधिवदुभयसम्मेलनं भावयित्वा।
मूलेनावाह्य देवं प्रयजतु सकलीकृत्य भक्त्योक्तनीत्या
कुर्यात् तुर्याह्निकोक्तस्नपनमपि तदिज्येह तद्बिम्ब एव।।१०४।।

---

१. 'शो' ख. घ. च. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

एवं बिम्बप्रासादादिजीर्णोद्धारमभिधायाथाष्टबन्धे जीर्णे कर्तव्यं कर्माह-जीर्णे सतीति। अष्टबन्धे जीर्णे शिथिले सति प्रासादशुद्ध्यादिकलशस्नानभूतबलिपर्यन्तां शुद्धिं यथोक्तमार्गेण कृत्वा शक्तिहोमकाले पूजामन्त्रहोमावसाने नवशक्तीनां संहारमार्गाद्धोमेन सम्पातितसम्पातं स्वीकृत्य पुनर्नवशक्तिभिः सृष्टिक्रमेण यथाशक्त्याज्यं हुत्वा चतुर्द्रव्यं स्विष्टकृदादिकं च हुत्वा होमं समाप्यान्तर्गत्वा स्वार्हसम्पातसिक्तां संहारहोमात् सम्पादितेन सम्पातेन सिक्तां तदधिगतचितिं जीर्णाष्टबन्धगतचैतन्यम् आदिना प्रणवेन देवे व्याप्य उद्वास्य तन्मलं जीर्णाष्टबन्धशकलमपि परिशोध्य परितः शोधयित्वा अभिषिच्य रत्नसुवर्ण-सिकताभिस्तद्विवरं प्रपूर्यार्चितेऽस्मिन् पीठे बीजेन स्वस्वशक्तिबीजेन प्रकृतिं, बिम्बे मूलेन पुमांसमप्यावाह्य उभयोश्च साङ्गीकृत्य पीठे लिपिन्यासपीठन्यासादिभिः, बिम्बे लिपितत्त्वन्यासादिभिश्च सकलीकृत्य स्नपनमवसानान् स्नानपर्यन्तानुपहारान् समर्प्य पुण्याहप्रोक्षणान्ते 'अष्टबन्धदेवताः प्रीयन्ताम्' इत्यादिविशेषेण सह पुण्याहं कृत्वा द्वयं पीठं बिम्बमपि वसनाद्यैर्विभूष्यालङ्कृत्य जलगन्धादिभिरुपहारैः इष्ट्वा नवशक्तिहोमाज्जातं संपातं समर्प्य विधिवत् प्रतिष्ठापटलोक्तविधिनाष्टबन्धं कृत्वा स्थापयित्वा उभयसम्मेलनं प्रकृतिपुरुषयोरन्योन्यसंयोगं प्रणवव्यापकेन भावयित्वा मूलेन देवमावाह्य सकलीकृत्य भक्त्या तं देवं प्रयजतु। पुनरुक्तनीत्या प्रागुक्तविधिना तुर्याह्निकोक्तस्नपनमपि प्रतिष्ठावच्चतुर्थदिवसस्नानमपि कुर्यात्। इहाष्टबन्धे तदिज्या त्रिदिनगता पूजा तद्बिम्ब एव। नात्र कवाटबन्धनादिकं कर्तव्यमित्यर्थः।।१०३, १०४।।

विवरणम्

पीठादिजीर्णतायां निष्क्रामणं प्रागेव सिद्धम्। अष्टबन्धजीर्णतायां कः प्रकार इत्यत आह-जीर्णे सतीति। स्वार्हसम्पातसिक्तामिति। प्रतिलोमपठिताभिर्नवशक्तिभिर्हुत्वा तत्सम्पातेन संहारक्रमेण संस्पृश्येत्यर्थः। आदिः प्रणवः। अर्चितेऽस्मिन् पीठपूजापूर्वकं देव इति शेषः।।१०३।।

विधिवदिति। स्थापनसमये प्रतिपादितो निजो न्याय उक्तः। तदिज्येह तद्बिम्ब एवेति। न तु स्थापनोक्तवन्मण्डपे मन्त्रसन्तर्पणमात्रमिति भावः।।१०४।।

Shripuram Publications
www.shripuram.org

शङ्खः षड्गुणितः पयोधिगुणितः सर्जो द्विवृद्धाभया
कार्पासोपलवालुकाः सजतुकाः प्रत्येकमेकांशकाः।
लाक्षार्धामलकीसमेतमखिलं सञ्चूर्ण्य संयोजितं
तैलक्लिष्टसुपिष्टमात्मनवशक्त्यात्माष्टबन्धं विदुः।।१०५।।

विमर्शिनी

अष्टबन्धद्रव्याणि सपरिमाणान्याह-शङ्ख इति। शङ्खः षड्गुणितः षड्भिर्भागैर्युतः। सर्जः पयोधिगुणित चतुर्भिरंशैर्युतः। (സർജ്ജം=ചെഞ്ചല്യം) अभया द्विवृद्धा द्विभागयुता। (അഭയാ=കടുക്ക) सजतुकाः जतुकसहिताः कार्पासोपलवालुकाः प्रत्येकमेकांशकाः। एतानि चत्वारि द्रव्याणि प्रतिद्रव्यमेकैकांशयुक्तानि। (ജതുകം=അരക്ക്. കാർപ്പാസം=പരിത്തി. ഉപലം=കോഴിപ്പരൽ. വാലുക=ആറ്റുപാറ) लाक्षार्धामलकीसमेतं लाक्षाया जतुकस्यार्धांशमानेन आमलकीफलेन युतम्। (ആമലകീ=നെല്ലിക്കാ) एतदखिलं द्रव्याष्टकं संचूर्ण्य सम्यक् सूक्ष्मचूर्णानि सम्पाद्य संयोजितं सम्यगेकीकृतं तैलक्लिष्टसुपिष्टं तैलेन क्लोदितं सुतरां पेषितां च तद् आत्मनवशक्त्यात्मस्वस्वनवशक्तिस्वरूपमष्टबन्धं बुधा विदुः। अत्र कार्पासस्तत्काले योजनीय इत्युपदेशवशाद् भवति।।१०५।।

विवरणम्

सम्प्रत्यष्टबन्धद्रव्यादिकं दर्शयति-शङ्ख इति। द्विवृद्धा द्विगुणिता। अभया पथ्या। लाक्षा जतु लाक्षार्धमामलकी तया समेतम् अर्धप्रमाणामामलकीमित्यर्थः। आत्मनवशक्त्या आत्माष्टबन्धमिति। आत्मनः परस्य या नव शक्तयः तदात्मकमष्टबन्धम्। अत्र नवम्या स्थानं तैलमवगन्तव्यम्।।१०५।।

बलिपीठमहाध्वजादिजीर्णौ
विहितैर्देवविशुद्ध्यवस्तुतैस्तत्।
सुविशोध्य समर्च्य देवमस्मै
बलिमाधाय निबोधयेद् विधेयम्।।१०६।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ परिवाराणां जीर्णोद्धारविधिमाह-बलिपीठेति। बलीपीठमहाध्वजादिजीर्तौ इन्द्रादिबलिपीठानां महाबलिपीठस्य महाध्वजरङ्गादेश्च जीर्तौ सत्यां विहितैः कृतैः देवविशुद्ध्यवस्तुतैः देवस्य सप्तशुद्धिशेषैः होमकलशशेषैः कलशशेषैश्च तज्जीर्णमहा-पीठादिकं सुविशोध्य देवं समर्च्य भूतबलिं चाधाय अस्मै देवाय विधेयमनुष्ठेयं निबोधयेत् विज्ञापयेत्।।१०६।।

विवरणम्

परिवारविषयमाह-बलिपीठेति। देवस्य शुद्धिं कृत्वा तत्तच्छेषेण तस्यापि शुद्धिं कुर्यात्। देवं पूजयित्वा तस्यापि बलिहरणं कुर्यात्।।१०६।।

अथ तत्पुरतः प्रतीपवृत्त्या
शरतत्त्वैर्हवनं विधाय मन्त्री।
अभिषिच्य च तद्घटेन तस्मिन्
स्वविभूत्यप्ययमञ्जसा प्रकल्प्य।।१०७।।

कलशे परिपूरिते तदग्रे
चितिमावाह्य ससूत्रमत्र[1] संस्थाम्।
उपनीय च गर्भधाम्नि सिक्त्वा
गमयेत् तत्सिरयैव देवदेवे।।१०८।।

विमर्शिनी

अथ मन्त्री मन्त्रातिदेशे कर्मातिदेशे च कुशलो गुरुः तत्पुरतः तस्य बलिपीठादेः पुरतः प्रतीपवृत्त्या संहारक्रमेण शरतत्त्वै स्वस्य देवस्य पञ्चतत्त्वैः हवनं तत्त्वहोमं विधाय तद्घटेन तत्तत्त्वहोमकलशेन तमभिषिच्य तस्मिन् महाबलिपीठादौ स्वविभूत्यप्ययं स्वस्वव्याप्तेः संहारमञ्जसा प्रकल्प्य तदग्रे परिपूरिते कलशे ससूत्रं सूत्रच्छेदविधानयुक्तं यथा भवति तथात्र संस्थां स्थितां चितिमावाह्य कलशे योजयित्वा तत्कलशमन्तरुपनीय देवाग्रे गर्भधाम्नि सिक्त्वा तत्सिरयैव तन्मार्गेणैव देवदेवे गमयेत् योजयेत्।।१०७, १०८।।

---

१. 'ग्र' ख. ग. पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

अथ कर्तव्यं विज्ञापयेत् तत्रापि संहारतत्त्वहोममाह-अथ तत्पुरत इति। साध्विति सूत्रच्छेदरीत्येत्यर्थः। अञ्जसेति। पञ्चतत्त्वप्रणवव्यापकादिभिरित्यर्थः।।१०७।।

अत्र संस्थां चितिं जीवम्।।१०८।।

गर्भन्यासप्रभृतिविधिना कारुणा कारयित्वा
तोयावासप्रभृतिविधिभिः शुद्धिभिः सप्तभिश्च।
संशोध्यैतद् विधिवदधिवास्य प्रतिष्ठादि सर्वं
कुर्वीताथ प्रथमविधिवत् तुर्यवारोक्षणान्तम्।।१०९।।

विमर्शिनी

पुनस्तत्र तत् सर्वं जले त्यक्त्वा संशोध्य गर्भन्यासप्रभृतिविधिना पूर्वोक्तविधिनैव पूर्ववदेव कारुणा कारयित्वा तदानीं तोयावासप्रभृतिविधिभिः जलाधिवासबिम्बशुद्ध्यादिभिः क्षालनादिसप्तशुद्धिभिश्च तत् संशोध्य विधिवत् पूर्वोक्तप्रकारेणैवाधिवास्य प्रतिष्ठादि सर्वं कर्म कुर्वीत। अथ प्रथमविधिवत् पूर्वप्रतिष्ठावत् तुर्यवारोक्षणान्तं चतुर्थदिवस-स्नपनानन्तरं[1] तदवस्रावप्रोक्षणबलिदानपर्यन्तं कूर्वीत।।१०९।।

विवरणम्

विधिवदिति स्वस्थापनोक्तो न्यायः परामृष्टः।।१०९।।

जीर्णोद्धृतिं स्थापितमन्त्रबिम्ब-
गृहादिजीर्तौ सपदीति कुर्यात्
दुःस्थोऽन्यथा चेद् विपदे तथा चेत्
सुस्थोऽत्र देवो यदु[2] सम्पदे स्यात्।।११०।।

विमर्शिनी

जीर्णोद्धारविधिमुपसंहरति-जीर्णोद्धृतिमिति। स्थापितमन्त्रबिम्बगृहादिजीर्तौ प्रतिष्ठापितस्य मन्त्रबिम्बस्य गृहादेः प्रासादादीनां त जीर्तौ वैकल्ये सति सपदि तदानीमेव इति उक्तप्रकारेण जीर्णोद्धृतिं नवीकरणं कुर्यात्। अन्यथा चेत् जीर्णोद्धारणं न क्रियते

१. 'राव' ग. पाठः। २. 'दि' ग. घ. पाठः।

Shripuram Publications
www.shripuram.org

चेद् दुःस्थो दुःखरूपेण स्थितो देवो विपदे तत्संबन्धिनां विनाशाय स्यात्[१]। तथाचेत् जीर्णोद्धृतिः क्रियते चेत् सुस्थः सुखेन स्थितो देवोऽत्र स्थाने तत्संबन्धिनां च संपदे अभ्युदयाय स्यात्। यदु[२] यच्च यस्मात् तस्मात् जीर्णोद्धापं कुर्यादिति पूर्वत्र[३] संबन्धः।।११०।।

विवरणम्

जीर्णोद्धारप्रकरणमुपसंहरंस्तदकरणे प्रत्यवायं करणेऽभ्युदयञ्च दर्शयति- जीर्णोद्धृतिमिति। यदु सम्पद इत्युकारः समुच्चयार्थोऽवधारणार्थो वा द्रष्टव्यः। यच्छब्दो हेत्वर्थः। यस्माद्देवः अन्यथा चेत् जीर्णोद्धृतावकृतायां दुस्थः सन्विपद एव स्यात्। तथा चेत् जीर्णोद्धारः कृत एव चेत् सुस्थस्सन् सम्पदे च स्यात्। तस्मात् सपदि सद्यो जीर्णोद्धृतिं कुर्यात्।।११०।।

इत्येकबेरविषये स्थापनाद्यं समीरितम्।
बहुबेरविधानेऽथ[४]भेदमात्रं प्रदर्श्यते।।१११।।

विमर्शिनी

एकबेरप्रतिष्ठाकर्मोपसंहृत्य बहुबेरप्रतिष्ठां प्रस्तौति-इतीति। एकबेरविषये एक एव बेरो बिम्बं प्रतिमासाधनद्रव्यं यत्र स एकबेरः तथा बहुबेरशब्दोऽपि ज्ञातव्यः। तत्रैकबेरविषये एकबेरं विषयीकृत्य स्थापनाद्यं स्थापनपूजनस्नानाद्यम् इति उक्तप्रकारेण समीरितं सम्यगुक्तम्। अथेदानीं बहुबेरविधाने बहुबेरकरणे तदनुष्ठाने च भेदमात्रं योऽयमुक्तकर्मणो भेदो विशेषः तन्मात्रमेवास्माभिः प्रदर्श्यते।।१११।।

शूलं वार्यधिवास्य बिम्बकलशैः सिक्त्वाधिवास्याग्रतः
प्रासादे परिशोधिते मणिगणन्यासादि कृत्वा गुरुः।
संस्थाप्य स्वपदेऽभिषिच्य कलशाभ्यां प्राच्र्य संरक्ष्य तत्
तक्ष्णा मृन्मयमूलबिम्बमुपबिम्बं चेप्सितं कारयेत्।।११२।।

अथ प्रस्तुतं बहुबेरानुष्ठानं सूत्रयति-शूलं वार्यधिवास्येति। तत्र-

"रत्नलोहशिलाधातुमृत्काष्ठालेख्यभेदतः।
प्रतिमा[५] सप्तधा ज्ञेया"

---

१. 'त्। यस्मात् तथा' घ. ङ. च. 'त्। तस्मात् त' ख. पाठः। २. 'दुतय' ङ पाठः। ३. 'र्वसं' ख. घ. ङ. च. पाठः। ४. 'तद्भेद' क. पाठः। ५. 'ष्ठा'

Shripuram Publications www.shripuram.org www.shripuram.org

इति विष्णुसंहितायां प्रतिमायाः[१] सप्तविधत्वमुक्तम्। तथान्यत्र-

"प्रतिमा योनिभेदेन पञ्चधा परिकीर्तिता।
शैलं रात्नं तथा लौहं दारवं मार्तिकं तथा।।"

इति पञ्चविधत्वमुक्तम्। "प्रतिमाष्टविधा स्मृते"ति भागवते। षोढेति सिद्धान्तसारे। तत्र मणिलोहशिलाप्रतिमाः एकबेरविधानेन स्थाप्याः। इतरा बहुबेरविधानेन। तत्र मुरारिराह-

"एकबेरं शिलालोहमणिजं सर्वदेष्यते।
मृद्दारुजं तथालेख्यं बहुबेरमिति स्थितिः।।"

इति। तत्र दारवी प्रतिमा यथोक्तप्रकारेण दारुं परिगृह्य यथोक्तप्रकारेण कारुभिः कारयित्वा वक्ष्यमाणबहुबेरानुष्ठानक्रमेण स्थापनीया। मृन्मयप्रतिमाविधानमिह किञ्चित् प्रकाश्यते। मृन्मयी प्रतिमा द्विविधा पक्वापक्वविभागेन। तत्र पक्वा नातिशुभा। अपक्वा तु सर्वाचार्यैः शुभेति प्रोक्ताः तथा नारदीयपद्धतौ-

"मृन्मयीं प्रतिमां वक्ष्ये यथावत् तां निबोध मे।
पक्वापक्वे द्विधा प्रोक्ते मृन्मय्यौ प्रतिमे क्रमात्।।
न सर्वलोकाः शंसन्ति प्रतिमां दग्धमृन्मयीम्।
अपक्वा प्रतिमा शस्ता सैव कार्या विचक्षणैः।।
सुधया नैव कुर्याद्वै नाश्मचूर्णैस्तु कारयेत्।
मृदैव मृन्मयीं कुर्याद् यथावर्णानुरूपतः।।
ब्राह्मणस्य सिता मृद्वै क्षत्रियस्यारुणा स्मृता।
विशां पीता भवेन्मृद्वै कृष्णा शूद्रस्य कीर्तिता।।
मृदं वर्णानुरूपेण गृह्णीयात् क्षेत्रसम्भवाम्।
दधिसर्पिः पयोभिश्च अतसीस्नेहसंयुतैः।।
शर्करालोहपाषाणैश्चूर्णं कृत्वानुपूर्वशः।
समभागानि चूर्णानि मृत्तिकायां प्रयोजयेत्।।

१. 'नां' ख. घ. च. पाठः।

Shripuram Publications
www.shripuram.org

खादिरेण कषायेण आर्जुनेन च पेषयेत्।
श्रीवेष्टकं सर्जरसं कुङ्कुमं कुष्ठमेव च॥
कुन्दुरुश्च रसा ह्येते सर्वे सर्वरसान्विताः।
नदीसंगमतीर्थेषु पुण्योद्यानेषु वा पुनः॥
आदाय मृत्तिकां तत्र स्नेहचूर्णसमायुताम्।
मासं पर्युषितां कृत्वा कारयेत् प्रतिमां ततः॥
त्रिरात्रो[1]पोषिता सा तु शिलायससमा भवेत्॥"

इति। तत्र मुरारिराह-

"गर्तं कृत्वा निवा[2]ते तु स्थापयेत् तत्र मृत्तिकाम्।
शर्करालोहपाषाणचूर्णं दध्यादिभिः समम्॥
चतुर्थांशं मृदि क्षिप्त्वा कषायाभ्यां च पेषयेत्।
कषाये सर्वमालोड्य श्रीवेष्टादिसमन्विताम्॥
संगमादिमृदं पिष्टां सर्वचूर्णसमन्विताम्।
मासोषितां[3] पुनः पिष्ट्वा तनुयात् प्रतिमां शुभाम्॥
त्रिरात्रेण शिलावच्चेज्ज्ञेया तत्र सुयुक्तता।
पुनर्मासोषितत्वोक्तिरर्चाकाठिन्यसिद्धये॥
ततो गर्भगृहे पीठं कुर्याच्छूलसमन्वितम्॥"

इति। शर्करालोहपाषाणमिति। (ശർക്കര=കൊഴിപ്പരൽ)। लोहं सुवर्णरजतताम्रकांस्यानि। (പാഷാണം=ആറ്റുപാറ)। एतानि समभागानि कृत्वा मृदश्चतुर्थांशं योजयेदित्यभिप्राय इति। रत्नावल्यामपि तथैवोक्तं-"पूर्वोक्तां मृदं संगृह्य विवातगतां कृत्वा स्थापयेदि"त्यादि। अथ मृत्परिग्रहे शिलापरिग्रहवदाचार्यो देवं संपूज्य शिल्पिभिः सह प्रशस्तं मृत्स्थानं गत्वा तत्रान्विष्य लब्ध्वा यथोक्तप्रकारेण होमादिकं सर्वं कृत्वा उपोष्य गृहीत्वा शिल्पिने ददेत। तथाच शूलार्थं प्रतिमार्थं विहितं वृक्षविशेषं गत्वा यथोक्तप्रकारेण छित्त्वानीय शिल्पिभिः शूलानि कारयेत्। तत्र शूलकरणे मुरारिराह-

---

१. 'त्रौ' ङ पाठः। २. 'पा' ख. ग. पाठः। ३. 'क्षि'

www.shripuram.org
Shripuram Publications
www.shripuram.org

"वंशदण्डः[1] कटीदण्डो वक्षोदण्डस्तथैव च।
बाहुदण्डाश्च चत्वारः प्रकोष्ठास्तावदेव तु।।
पाददण्डावुभौ चैवं स्थूलदण्डास्त्रयोदश।"

इति। स्थितस्य देवस्य शूलानि स्युः। तथाच तत्स्थिरीकरणाय चत्वारि शूलानि च योजयेत्। तथाच मुरारिराह-

"प्रतिमासंमितायामं पृष्ठतो वृत्तमेव च।
उपघ्नशूलं कुर्वीत प्रतिमास्थितये पुनः।।
केचिच्चरणशूलं च पाशशूलं च कुर्वते।
चतुरः श्लेषयेद् दण्डान् द्विशिखानेव तान् पुनः।।
दण्डाः सप्तदशैते तु स्थाने प्रोक्ता विचक्षणैः।"

इति। एवं स्थितस्य देवस्य सप्तदश वा त्रयोदश वा शूलानि कुर्वीत। आसीने देवे तु मुरारिराह-

"तत्र स्याज्जानुसन्धिकम्।
जङ्घादि द्विशिखं कुर्यादूरुमेकशिखं तथा।।
एकोनविंशतिर्ज्ञेयाः शूलदण्डास्तथासने।
शयने च तथा दण्डा अत ऊर्ध्वं न कारयेद्।।"

इति। इत्यासनशयनयोरप्येकोनविंशतिः शूलदण्डा भवन्ति। रत्नावल्यामपि तथैवोक्तं-"खादिरादीन् पूर्वोक्तान् वृक्षान् समानीय पुण्याहं कारयित्वा प्रोक्ष्य शिल्पिभिस्तक्षयित्वा शूलानि कारयेद् यथोक्तप्रमाणानि"त्यादि। तत्र शूलं वार्यधिवास्येति। शूलमिति जातावेकवचनम्। त्रयोदशसंख्यानि सप्तदशसङ्ख्यानि एकोनविंशतिसङ्ख्यानि वा शूलानि शिल्पिभ्यो यथोक्तप्रकारेण गृहीत्वा यथोक्तप्रकारेणैवैकरात्रं जलेऽधिवास्य उत्तरेद्युर्बिम्बकलशैः स्वस्वबिम्बशुद्धिकलशैः सिक्त्वाग्रतो मण्डपे यथोक्तप्रकारेणाधिवास्य अत्राधिवासहोमेन सह रत्नहोमं कृत्वा ततो यथोक्तकालं यथोक्तप्रकारेण वास्तुपुण्याहान्तकर्मणा प्रासादे परिशोधिते सति सुमुहूर्तदिने पुण्याहपूर्वं नपुंसकशिलां प्रतिष्ठाप्य

१. 'ण्डाः' ख. घ. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org

मणिगणन्यासादि रत्नन्यासपीठस्थापनादिकं कृत्वा गुरुः प्रतिष्ठाविधानज्ञः मण्डपाच्छूलान्यानीय स्थितासीनशयानानां (स्वपदे) स्वस्वोक्ते स्थाने संस्थाप्य तानि शूलानि तत्र सम्यक् स्थिरीकृत्य कुम्भेशनिद्राकलशाभ्यामभिषिच्य प्राच्र्य तत् संरक्ष्य मृन्मयमूलबिम्बं स्वस्वपरिवारैर्युतं मृन्मयं मूलबिम्बं स्वेप्सितं तक्ष्णा कारयेत्। तथा उपबिम्बमर्चनाबिम्बादिकं चेप्सितं कारयेत्। अथ मूलप्रतिमा महती चेत् प्रासादरचनात् पूर्वमेव अधिष्ठाने कृते सति तत्र स्थले स्थलशुद्धिं कृत्वा यथोक्तनीत्या राक्षोघ्नहोमवास्तुहोमवास्तुबल्यादि कृत्वा रत्नहोमं च विधाय पुण्याहानन्तरं तद्गर्ते यथोक्तप्रकारेण संस्कृतां नपुंसकशिलां प्रतिष्ठाप्य तद्गर्तेषु रत्नन्यासं यथोक्तप्रकारेण कृत्वा तत्र शूलस्थापनं कृत्वा संपूज्य संरक्ष्य तक्षभिः लेप्यां[१] महाप्रतिमां कारयेत्। उभयथापि मृल्लेपनात् पूर्वं शूलान्यन्योन्यं बन्धयेत्। तत्र तिष्ठतो देवस्य नपुंसकशिलाया उपरि पादशिलां पीठं च यथोपपत्ति निधाय पादशिलाया गर्तद्वये द्वे पादशूले नपुंसकशिलास्पृष्टे यथा भवति तथा कृत्वा ते पादशूले कटिपर्यन्ते कृत्वा तत्र कटिदण्डेन सह श्लेषयेत्। शूलानां श्लेषणे सुषिरं कीलं च न कारयेत्। त्रिशिखं द्विशिखं निम्नं[२] च कृत्वा पृथक् पृथक् श्लेषयेत्। वक्षोदण्डस्य मध्ये तथा कटिदण्डे च मध्ये निम्नं कृत्वा तयोर्निम्नयोर्मध्ये वंशदण्डं निश्छिद्रं बन्धयेत्। वंशदण्डं तु मुखाद् मूर्धान्तं किरीटान्तं च बुधा प्राहुः। वक्षोदण्डं त्रिशूलाग्रं कुर्यात्। बाहुमूलानि त्रिशिखानि, प्रकोष्ठं द्विशिख कुर्यात्। पुनर्दण्डान् सर्वान् यथावच्छ्लेषयेत्। श्लेषिताञ्छलेषितांस्ताम्रपट्टेन वेष्टयेत्। यथा सन्धेर्दाढ्यं भवेत्, तथा वेष्टयेत्। एवं शूलानि बन्धयित्वा रज्जुवेष्टनं कुर्यात्। तत्र मुरारिराह-

"नालिकेरत्वचां सारं गृह्णीयाद् रज्जुकर्मणि।
समवृत्तायता रज्जुर्नातिस्थूला न वा कृशा।।
शलाकामात्रनाहा सा शूलग्रन्थिविवर्जिता।
न चैवातिदृढा कार्या नातिमृद्वी कदाचन।।
एवं रज्जुमयं कृत्वा सर्वेष्वङ्गेषु वेष्टनम्।
यथा शरीरे सर्वेषां चतुष्षष्टिः सिराः स्मृताः।।

१. 'ख्यां' ख. ग. च. पाठः। २. 'म्ननं' ख. घ. पाठः।

Shripuram Publications
www.shripuram.org

शूले तथैव पाशाः स्युः कर्तव्यास्तत्र कोविदैः।
शूलमस्थि सिरा रज्जुर्मृन्मांसं त्वक् पटो भवेत्।।
द्वाभ्यां द्वाभ्यां तु रज्जुभ्यां बद्ध्वा शूलं तु वेष्टयेत्।
मृदं संगृह्य पूर्वोक्तां ततो मासद्वयोषिताम्।।
चतुर्भिर्भाजिताभिश्च वालुकाभिर्विमिश्रयेत्।
ततस्त्रैकटुकं चूर्णं विंशत्यंशं तु मिश्रयेत्।
नीलिकेरत्वचां सारं छित्वा छित्वात्र मिश्रयेत्।।
आलोड्य त्रिफलातोये नालिकेररसान्विते।
नालिकेररसैः सार्धं सारयित्वा मृदं शनैः।
श्लेषयेत् स्थूलबन्धेषु सर्वाङ्गेषु शनैः शनैः।।
आर्द्रेष्वेव चतुष्केषु तेषु रज्ज्वा प्रवेष्टयेत्।
वेष्टयित्वा समीकृत्य मृदा चैव शनैः शनैः।।
त्रिरेव रज्ज्युबन्धं च त्रिशुष्कं चापि दा[1]पयेत्।
अत ऊर्ध्वं न रज्जुं च न शुष्कं चापि दापयेत्।।
मृदालिप्य शनैर्ज्ञात्वा शुष्काशुष्कं विचक्षणः।
कुर्याच्छरीरसंवेष्टं छेदच्छिद्रविवर्जितम्।।
हस्तेनैव मृदं दद्यात् कूर्चेन कटुशर्कराम्।
पिष्ट्वा त्रिफलतोयैस्तु शर्कराकल्कमेव च।।
कार्पासतूलसंयुक्तं सम्यक् कृत्वा विचक्षणः।
कूर्चेनैव तु तत् कल्कं शनैरेव परामृशेत्।।
ततः कृकणिकाग्रेण न्युप्ताङ्गानि च लेपयेत्।
क्लृप्तेष्वङ्गेषु सर्वेषु पटैराच्छाद्य बुद्धिमान्।।
शुक्तिकादिक्रियास्तत्र सर्ववर्णांश्च कारयेत्।
वर्णयोगविधिं पश्चात् प्रकुर्वीत यथाक्रमम्।।"

---

१. 'भावये' ख. पाठः।

Shripuram Publications
www.shripuram.org

इति। इत्याद्युक्तप्रकारेणोत्तमादिक्रमवशान्मूलप्रतिमाम् अतिमनोहराङ्गीं कृत्वा[१] मूलबिम्बत्रिभागादिप्रमाणनिर्मितां कर्मार्चामष्टांशादिप्रमाणकल्पितस्नानार्चादिकं च यथायोग्यं कारयित्वा कर्माण्यारभेत।।११२।।

विवरणम्

अथैकबेरविषयं स्थापनादिकं[२] प्रतिपादितम्। बहुबेरविषये तु विशेषः प्रतिपादनीयः। तमधुना प्रतिपादयन् प्रथमं शूलप्रतिष्ठामाह-शूलं वारीति।मार्त्तिकबिम्बप्रकृतिभूतं खदिरादिसारद्रुमनिष्पादनीयं शरीरवंशात्मकं शूलं तत्प्रतिष्ठासमुचितदिने प्रागुक्तनयेन परिगृह्य जलेऽधिवासयेत्। अग्रत इति। प्रासादस्य पुरोदेशे। संस्कृते मण्डप इत्यर्थः। मणिगणन्यासादि कृत्वेति। पीठप्रतिष्ठापनमादिशब्दार्थः। संस्थाप्य स्वपद इति। शूलमित्यनुवर्तते। अभिषिच्य कलशाभ्यामिति कुंभेशनिद्राकलशाभ्यामित्यर्थः। प्रार्च्येति प्रतिष्ठाशिष्टार्चन- मात्रमुक्तम्।।१११, ११२।।

सप्रासादमिदं प्रगृह्य मनुबिम्बं कर्मबिम्बं तथा
तत्कृत्यावसितौ प्रणीय सलिले तद् वासयेत् कौतुकम्।
कृत्वा वास्तुविधिं सुवस्त्रपरिमाष्टर्यार्चां च संशोधयेत्
संहृत्याग्रभृताप्सु दर्पणकृतच्छायाधिवास्याथवा।।११३।।

वमिर्शिनी

तत्र[३] प्रतिमापरिग्रहादिकमाह-सप्रासादमिति। तत्कृत्यावसितौ तेषां शिल्पिनां कृत्यावसाने तत्रादौ यथाकालं बीजवापं कृत्वा तद्योग्ये दिने इदं मनुबिम्बं मूलबहुबेरबिम्बं[४] स्थिरीकृतं चेत् सप्रासादं प्रासादेन सहितम्, अन्यथा चेत् पृथगेव मूलबिम्बं तथा कर्मबिम्बं च पूर्वोक्तप्रकारेण प्रगृह्य तत् कौतुकं कर्मबिम्बं जलाशयं प्रणीय सलिले वासयेत् जलाधिवासं कुर्यात्। परिग्रहात् पुरः कर्तव्ये नयनोन्मीलने अन्तःस्थितमूलबिम्बे घृतमधुलेशयुक्तया हेममय्या तूलिकया यथोक्तप्रकारेण वा दर्पणप्रतिबिम्बिते सम्यग[५]ञ्जयित्वा वा तच्छेषेण कर्मार्चापरिग्रहात् पुरस्तस्यामपि नयनोन्मीलनं पूरणं च यथोक्तं कुर्यात्। पुनः वास्तुविधिं प्रासादशुद्धिं च यथोक्तप्रकारेण कृत्वा सुवस्त्रपरिमाष्टर्या मुदुतरवस्त्रपरिमार्जनेन मूलार्चां च संशोधयेत्। अथवा संहृत्य भूतसंहारादिकं कृत्वा

---

१. 'त्वा बि' ख. च. पाठः। २. 'स्वा' क. पाठः। ३. 'त्र परि' ४. 'म्बे स्थिरीकरणं चे' ग. पाठः। ५. 'ग् वाञ्चयित्वा त' ख. ग. घ. च. पाठः।

Shripuram Publications www.shripuram.org

अग्रभूताप्सु पुरोभागगतकटाहस्थे जले दर्पणकृतच्छाया दर्पणे प्रतिबिम्बिता छायाधिवास्या भवेत्।।११३।।

विवरणम्

तत्कृत्यावसितामिदं मनुबिम्बं सप्रसादं प्रगृह्येत्यन्वयः। तत् कृत्यं तक्ष्णां व्यापारः बिम्बविषयः प्रासादविषयश्च। कौतुकं[1] कर्म बिम्बमेव। वास्तुविधिः प्रासादशुद्धिः सुवस्त्रपरिमाष्टर्याच्चर्वाञ्च संशोधयेदिति बिम्बशुद्धिरुक्ता। मृदुवस्त्रेण परितो मार्जनमेव बिम्बशुद्धिः। अथवाग्रभूताप्सु दर्पणकृतच्छाया संहृत्याधिवास्या इत्यन्वयः। दर्पणं बिम्बाग्रे निधाय तद्गतां च्छायां प्रागुक्तनयेन भूतसंहारादि कृत्वाग्निमयीं ध्यात्वाग्रगतकटाहजल-संस्कारादिपूर्वकं तत्र सच्छायं दर्पणं शाययेदित्यर्थः।।११३।।

नक्तं नक्तन्दिनं च त्रिनिशमपि जले वासयेज् रत्नलोहा-
श्मार्चास्तत्रोपनीय स्नपयतु कलशैः स्वोदितैः कर्मबिम्बम्।
बध्नीयात् कौतुकं च स्मरजिति सकले बिम्बकेऽघोरतः प्रा-
ङ्नेत्रोन्मेषं च कुर्यात् तदुदितमनुभिर्लक्षणोद्धारकाले।।११४।।

विमर्शिनी

जलाधिवासस्य कालनियममाह-नक्तमिति। रत्नलोहाश्मार्चाः रत्नमय्यो लोहमय्यः शिलामय्यश्चार्चाः क्रमेण नक्तं रात्रिमात्रं नक्तंदिनमहोरात्रं त्रिनिशं त्रिरात्रमपि जले वासयेत्। मृद्दारुशिललोहरत्नार्चाः क्रमेण सप्तरात्रपञ्चरात्रत्रिरात्राहोरात्ररात्रिमात्रकालं जलाधिवासं कुर्यादिति केचिदाहुः। पुनः कर्मबिम्बं तत्र स्नानमण्डपे उपनीय स्वोदितैः स्वस्वोक्तैः बिम्बशुद्ध्यर्थं विहितैः कलशैः स्नपयतु। स्वस्वोक्तकाले कौतुकबन्धं नेत्रोल्लेखनं च कुर्यात्। तत्र स्मरजिति सकले बिम्बके बिम्बशुद्ध्यनन्तरम् अघोरतः 'अघोरेभ्यः' इति मन्त्रेण कौतुकं च बध्नीयात्। तत्र प्राक् पूर्वं लक्षणोद्धारकाले लक्षणोद्धारस्य स्थाने तदुदितमनुभिः शिवनारायणस्य[2] नेत्रोल्लेखनार्थमुक्तैर्मन्त्रैः विधिवन्नेत्रोन्मेषं च कुर्यात्।।११४।।

---

१. 'कं बि' च. पाठः। १. 'स्य मनुभिर्मधुवातेत्यादिभिः लक्षणोद्धार उक्तैः' च. पाठः।

Shripuram Publications www.shripuram.org

विवरणम्

नक्तन्दिनमिति। सायमारम्भादेकां रात्रिमपरमहश्चेत्यर्थः। शिवे तु कर्मबिम्बं सकळं निष्कळं वा स्यात्। तद्यदि सकळं तत्र विशेषमाह-बध्नीयादिति। प्रागिति बिम्बपरिग्रहे लक्षणोद्धारकाले नेत्रोन्मेषं च कुर्यादित्यन्वयः।।११४।

कर्मार्चामधिवासयेत् समुपनीयालङ्कृते मण्डपे
मूलार्चामनुसन्धिक्लृप्तकलशासेकां च मूलालये।
छायावार्यधिवासनं यदि कृतं तस्यां[1] पृथक् साम्प्रतं
छायाबिम्बघटाभिषेकमपि तच्छुद्ध्यै पृथक् प्राचरेत्[2]।।११५।।

विमर्शिनी

तदनु कर्मार्चामलङ्कृते मण्डप उपनीयाधिवासयेत्। अनुसन्धिक्लृप्तकलशासेकां ध्यानेन कृतबिम्बशुद्धिकलशां मूलार्चां मूलालये प्रासादे चाधिवासयेत्। तस्यां मूलार्चायां छायावार्यधिवासनं दर्पणच्छायायां जलाधिवासनं पृथक् कृतं यदि तर्हि साम्प्रतम् इदानीं तच्छुद्ध्यै तस्या मूलार्चायाः शुद्ध्यै (छाया) बिम्बघटाभिषेकमपि दर्पणच्छायायां पृथक् प्राचरेत्।।११५।।

www.shripuram.org

विवरणम्

मूलालय इति। अधिवासयेदित्यनुषज्यते। यत्र मार्जनमात्रमेव शोधनं तत्र ध्यानबिम्बशुद्धिरियम्। दर्पणच्छायापक्षे तु कर्मबिम्बशुद्धिरित्याह[3] छायेति।।११५।।

बिम्बं प्रासादसंस्थं विधिवदखिलतत्त्वाप्ययोत्पत्तिमन्त्रा-
त्मोन्मेषाध्वौघमन्त्रन्यसनमनु यजेन्मानसैश्चोपहारैः।
संशोध्यैतत् क्रियाबिम्बकमपि यजतां मण्डलेज्यादियुक्तं
तस्मिंस्तत्त्वाधिवासाहुतिभवमथ सम्पातमापातयेच्च।।११६।।

विमर्शिनी

पुनः प्रासादसंस्थं मूलबिम्बं विधिवद् यथोक्तमार्गेण अखिलतत्त्वाप्ययोत्पत्तिमन्त्रात्मोन्मेषाध्वौघमन्त्रन्यसनमनु अखिलानां तत्त्वानां संहारं शोषणादिकं तत्त्वानां सृष्टिं

---

१. 'स्याः' इति मूलकोशपाठः। २. 'चा' ग पाठः। ३. 'मि' क पाठः।

Shripuram Publications
www.shripuram.org

मन्त्रोदयप्राणायामादिकं षडध्वन्यासादिकं च विस्तरेण कृत्वा[1] 'मधु वाते'त्यादिभिर्लक्षणोद्धार उक्तैर्मन्त्रैः तदनु मानसैरुपहारैः यजेच्च। एतत् क्रियाबिम्बकमपि भूतसंहारादिभिः संशोध्य मूलमन्त्रप्राणायामन्यासादिसहितं मण्डलेज्यादियुक्तं मण्डलपूजादिभिः सह यजताम्। अथ तस्मिन् तत्त्वाधिवासाहुतिभवं संपातं तत्त्वहोमेनाधिवासहोमैः शान्तिहोमेन च सम्भूतं सम्पातमापातयेत् स्पृशेच्च।।११६।।

विवरणम्

अथाधिवासदिवसं दर्शयति-बिम्बमिति। तस्मिन्निति कर्मबिम्बे।।११६।।

लेप्यादिप्रतिमासमेतमभितः प्रासादमष्टासु दिक्ष्वा-
धेयान्यधिवासनोक्तहवनान्यग्निं प्रणीयाग्निजे।
श्रीवृक्षप्रभवा निशाचरदिशि श्रीपर्णिकोत्थास्तथा
वायव्यां समिधोऽणुरस्त्रमुभयोः शेषः क्रमः पूर्ववत्।।११७।।

विमर्शिनी

तत्र कुमारे विशेषमाह-लेप्यादीति। अग्निजे लेप्यादिप्रतिमासमेतं मृन्मयादि-बहुबेरबिम्बयुक्तं प्रासादमभितः परित्तोऽष्टासु दिक्षु कुण्डेष्वग्रस्थाद् गुरुकुण्डादग्निं प्रणीय गुरुमूर्तिपैरधिवासनोक्तहवनान्याधेयानि। तत्र निशाचरदिशि श्रीवृक्षप्रभवा बिल्वजाः, वायव्यां तथा श्रीपर्णिकोत्थाः काष्मर्यश्च समिधः स्युः। उभयोरस्त्रमेवाणुः। शेषः क्रमः पूर्ववदेव।।११७।।

विवरणम्

अथ स्कन्दे विशेषं कञ्चिदाह-लेप्यादीति। लेप्या चित्रमयी मूलप्रतिमा। अभितः परितः। एकबेरेऽपि मण्डपं परितः स्यादयं होम इति केचित्।।११७।।

नीत्वान्तः सकलं परेद्यवि परावाहादि कृत्वा सुधी-
र्मूलार्चान्यसनं विभाव्य विधिवद् विज्ञाप्य देवं ततः।
कर्मार्चामपि तत्पुरः पुनरियं सा देवते मूर्तिरो-
मित्युच्चार्य मनुं विहीनमणिके संस्थापयेत् स्वे पदे।।११८।।

---

१. 'त्वा त' ग. ङ. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

परेद्यवि उत्तरदिवसे प्रातरेव प्रासादप्रतिष्ठां कृत्वा। बहुबेरबिम्बं तदानीमेव स्थाप्यते चेत् तद् यथायोग्यं कुर्यात्। लेप्यादिप्रतिमा निश्चला प्रासादे पूर्वमेव स्थापिता चेत् प्रासादप्रतिष्ठानन्तरं नपुंसकशिलास्थापनं रत्नन्यासं पीठप्रतिष्ठां च मनसा विधाय पीठपूजां च कृत्वा। अत्रार्चनामूर्तिः स्थिरा चेत् तन्नपुंसकशिलामपि स्थापयित्वा पीठं चास्थाप्य सम्पूज्य मण्डपमासाद्य संपूज्य तत्र मूलबेरसद्भावे तत्रान्यथा चेत् कर्मबिम्बे सर्वमुद्वास्य यथाक्रममन्तः सकलं नीत्वा मूलार्चायां परावाहनमवस्थावाहनं मन्त्रावाहनं च कृत्वा मूलार्चास्थापनं यथाविधि भावयित्वा 'ध्रुवा द्यौरि'त्यादिना स्थिरीकरणं विभाव्य 'विश्वतश्चक्षुरि'त्यादिना प्रार्थयेत्। कर्मार्चायां परावाहनं मन्त्रावाहनं च कृत्वा संपूज्य मूलार्चागतं देवं विज्ञाप्य तत्पुरोभागे विहीनमणिके रत्नन्यासरहिते स्वे पदे 'इयं सा देवते मूर्तिरोमि'ति मूलमन्त्रपुटितं पञ्चतत्त्वमूलं प्रणवं चोच्चार्य कर्मार्चां संस्थापयेत्। सुधीरिति मूलबेरप्रतिष्ठायां प्रतिष्ठाकर्मोक्तमखिलं ध्यायन्नित्यर्थः।।११८।।

विवरणम्

सकलमिति। स्यान्नीराजनमग्रत इत्याद्युक्तप्रकारेणेत्यर्थः। परावाहादीति परावाहनमवस्थावाहनमित्युभयत्र कार्यम्। मूलार्चान्यसनं विधिवद्विभाव्येति। ध्याने नपुंसकरत्नपीठे प्रतिष्ठापनमपि न्यायात् प्रदर्शितमेव। विज्ञाप्येति लोकानुग्रहहेत्वर्थमित्याद्युपस्थानमुक्तम्। तत्पुरः तस्य मूलार्चाया अग्रभागे कल्पिते स्थाने पीठमात्रे च प्राक् प्रतिष्ठापित इत्यर्थः। "इयं सा देवते मूर्तिरोम्" इति तत्प्रतिष्ठामन्त्रः।।११८।।

शैलादिस्थिरकर्मकौतुकविधौ चेष्टोऽष्टबन्धोऽत्र तत्-
प्राणन्यासवियुक्तमुक्तमखिलं कृत्वा निवेद्यान्तिमम्।
सूनैर्निस्सलिलैस्तदाहितचितिं संयोज्य मूले ततः
प्राणन्यासपुरस्सरं समुचितं सर्वं प्रकुर्वीत च।।११९।।

विमर्शिनी

शैलादिस्थिरकर्मकौतुकविधौ शिलादिभिः स्थिरा कर्मार्च्चा स्थापिता चेदत्र अष्टबन्ध इष्टो योग्यः। अन्येष्वपि बिम्बेषु सत्सु तत्स्थापनं च कृत्वात्र कर्मार्चायां तत्प्राणन्यासवि-

Shripuram Publications
www.shripuram.org

युक्तमखिलम् अष्टबन्धध्रुवमन्त्रजपाद्यनन्तरं कुम्भेशनिद्राघटाभ्यां यथोक्तप्रकारेणाभिषिच्य जीवावाहनं स्थूलावाहनं स्तोत्रावाहनादिकं च कृत्वा मूलमन्त्रेणावाह्य संपूज्य पायसनिवेद्यान्ति[१]मं च कृत्वा पुन[२]ः निर्जलैः पुष्पैस्तदाहितचितिं तत्रस्थं चैतन्यं मूलपुटितपञ्चतत्त्वैर्मूलार्चायां संयोज्य प्राणन्यासपुरस्सरं सर्वं समुचितं कर्म तत्त्वन्यासं षडध्वन्यासादिकं मानसपूजनं च प्रकुर्वीत च 'लोकानुग्रहेत्यादि'स्तु[३]त्यादिकं च कुर्यात्।।११९।।

विवरणम्

प्राणन्यासवियु[४]क्तं तदुक्तमखिलमत्र कृत्वेत्यन्वयः। अत्र कर्मबिम्बे ततो मूले संयोज्येति। संयोजनमन्त्रस्तु "प्रष्ठोङ्कारे"त्यादि सिद्ध एव ग्राह्यः। सर्वमिति। तत्र पुष्पैरे[५]व जीवावाहनमप्युक्तम्।।११९।।

पीठेज्यादिसमुज्ज्वले समभिवाह्यातः क्रियाबिम्बके
मन्त्रन्यासपुरस्सरं विधिवदत्राभ्यर्च्य देवं स्वयम्।
नीत्वा मूलतनौ ततः स, सकलीकृत्योपहारैः परै-
रेनं मानसजैः समर्च्य परिजप्य प्रीणयेद् भक्तितः।।१२०।।

विमर्शिनी

ततो नित्यपूजाविधिमाह-पीठेज्यादीति पीठेज्यादिसमुज्ज्वले पीठपूज्या मूर्तिकल्पनया च युते अतः मूलबिम्बात् क्रियाबिम्बके प्रोक्तक्रमात् समभिवाह्य मूलेन स्वहृदयादप्यावाह्य मन्त्रन्यासपुरस्सरं विधिवदत्र देवमभ्यर्च्य निवेद्य परिषद्बलिं तत्प्रार्थनं प्रसन्नपूजां च कृत्वा पुनः पूर्ववद् देवं स्वयं मूलतनौ नीत्वा ततः सकलीकृत्य मानसजैः परैरुत्कृष्टैरुपहारैः एनं समर्च्य परिजप्य भक्तितः प्रीणयेत्। पुनर्यथोक्तान् मन्त्रान् जपित्वा चि[६]च्चेत्यसंमेलनादिकं च कृत्वा समापयेत्।।१२०।।

विवरणम्

पीठेज्यादीति मूर्तिकल्पनमप्युक्तम्। नियमपूजार्थं चैतदवगन्तव्यम्। ततस्सुसकलीकृत्येति षडध्वभिर्लिपितत्त्वमन्त्राक्षरादिभिर्वा यथाविधि सकलीकृत्येत्यर्थः।।१२०।।

---

१. 'तिलश्चतु पु' ख. पाठः। २. 'नः शङ्खगतैः नि' ग. छ. पाठः। ३. 'दिकं' ग. पाठः।
४. 'मु' च. पाठः। ५. 'वं' क. पाठः। ६. 'च्चै'

www.shripuram.org
Shripuram Publications
www.shripuram.org

तत्तत्कर्मकृते प्रणीय मनुबिम्बात् कर्मबिम्बेऽमुना
कुर्यात् तुर्यदिनाभिषेकयजनाद्यं कर्म सर्वं सुधीः।
स्थास्नुन्यत्र ततोऽपि देवमुपनीयान्यत्र बिम्बेऽमुना
स्नानादीनि समाचरेदिह समिज्या कर्मबिम्बे सदा।।१२१।।

विमर्शिनी

पुनः तत्तत्कर्मकृते तत्तत्कर्मविधानार्थं मूलमनुबिम्बात् कर्मबिम्बे प्रणीय अमुना कर्मबिम्बेन तुर्यदिनाभिषैकयजनाद्यं चतुर्थदिवसस्नानपूजादिकं सर्वं कर्म कुर्यात्। सुधीरिति तत्तत्कर्मानन्तरं तत्तत्कर्मसंस्कारं मूलबिम्बे योजयितुं समर्थ इत्यर्थः। अत्र कर्मबिम्बे स्थास्नुनि निश्चले ततः तस्मादप्यन्यत्र स्नानबिम्बे[१] देवमुपनीय अमुना स्नानादीनि समाचरेत्। अमुना स्नानबिम्बेन इह बहुबेरे समिज्या पूजा सदापि कर्मबिम्ब एव।।१२१।।

विवरणम्

अमुनेति कर्मबिम्बेनेति। स्थास्नुन्यत्रेति। यत्र कर्मबिम्बमष्टबन्धयुतं स्थिरं कल्पितं तत्रापरं स्नानबिम्बमपि कार्यम्। तस्य च पूजाबिम्बेन सह संस्कारः स्थापनं च विधेयम्। तत्र स्नानसमये पीठपूजां कृत्वा मूर्तिं संकल्प्य तत्र स्थिरबिम्बादावाह्य स्नपनं कृत्स्नं कृत्वा पुनस्ततश्चलबिम्बात् स्थिरबिम्बे नियोज्य पूजां समापयेदित्यर्थः।।१२१।।

शुद्धौ चाखिलकर्म कर्मकृतबिम्बे योजयित्वा पृथक्
तत्त्वापीत्युदयादि मूलमनुबिम्बे कर्मबिम्बेऽपि वा।
उद्धारे जनितत्त्वसर्पिरुपबिम्बस्थे समर्प्य स्वगे
हुत्वाभ्यर्च्य पुरोगते स्वपदगे विश्वं विलाप्याग्र्यंगे[२]।।१२२।।

सिक्त्वा मूलगतं प्रणीय कलशे सिक्त्वामुना कार्मिकं
तस्माज्जीवघटे सुयोज्य लघुगेहस्थाल्पबिम्बे नयेत्।
कृत्वा सर्वमिहैकबेरविधिना सम्पाद्य सर्वं ततः
प्रत्यापत्तिमपि प्रसिद्धबहुवेरन्यायतः प्राचरेत्।।१२३।।

---

१. 'म्बे असुना दे' ङ पाठः। २. 'प्र' इति मुलकोशपाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

शुद्धौ प्राप्तायाम् अखिलकर्म क्षालनादीनि कर्माणि कर्मकृतबिम्बे कर्मार्थं कृते बिम्बे पृथक् पृथग् योजयित्वा पृथक् पृथक्[१] संपूज्य पृथक् पृथग् योजयेत्। अत्र पञ्चकस्नानात् [२]पूर्वमुक्तं तत्त्वापीत्युदयादि तत्त्वसंहारादि मूलबिम्बे कुर्यात्, कर्मबिम्बेऽपि कुर्याद्वा। उद्धारे जीर्णोद्धारनिमित्ततत्त्वहोमे जनितत्त्वसर्पिः सृष्टितत्त्वहोमसंपातमुपबिम्बस्थे देवे समर्प्य स्वगे मूलबिम्बयोजिते देवे हुत्वा संहारतत्त्वहोमं कृत्वा ततः पुरोगते कर्मबिम्बे योजयित्वाभ्यर्च्य पायसं निवेद्य होमं समाप्य ससम्पातं तत्त्वकलशमन्तर्नीत्वा स्वपदगे मूलबिम्बगते देवे विश्वं विलाप्य[३] ध्यानसंकोचं कृत्वा अग्र्यगे कर्मबिम्बगते देवे सिक्त्वा तत्त्वकलशेनाभिषिच्य मूलगतं मूलबिम्बयोजितं देवं सिक्त्वा तस्मादप्यग्रगते जीवघटे सुयोज्य मण्डपमानीय तत्र शय्यायां शायितेनाल्पबिम्बेन सहाधिवास्योत्तरेद्युः लघुगेहस्थाल्पबिम्बे बालालयेऽल्पबिम्बं संस्थाप्य अत्र नयेत् योजयेत्। इहाल्पबिम्बस्थे देवे चतुर्थदिवसस्नानादिकं सर्वं कर्मैकबैरविधिना कृत्वा ततः सर्वं मूलबिम्बकर्म प्रासादादिकं संपाद्य सम्यक् कारयित्वा ततस्तस्मात् प्रत्यापत्तिं स्वप्रासादप्राप्तिमपि प्रसिद्धबहुबेरन्यायतः पूर्वोक्तबहुबेरानुष्ठानन्यायेन प्राचरेत्।।१२२, १२३।।

विवरणम्

इत्थं बहुबेर[४]स्थापनमभिहितम्। पूजाप्रकारश्च दर्शितः। सम्प्रति शुद्धिविषयं विशेषं दर्शयति-शुद्धाविति। तत्त्वापीत्युदयौ पञ्चकाभिषेकादर्वाक् कर्तव्यौ विवक्षतौ। अथ जीर्णोद्धारे भेदं वदति-उद्धार इति। जनिशब्दः सृष्टिपर्यायः। देवशब्दोऽत्रानुकृष्यते। कर्मबिम्बे पीठपूजादिपूर्वकं मूलबिम्बाद् देवमावाह्य सृष्टितत्त्वसम्पातं तत्तस्थाने निषिच्य मूलबिम्बे योजयित्वा नाडीसन्धानादि कार्यम्। पुनरनुज्ञार्चनं कर्मबिम्ब आवाह्य विधेयम्। पुनर्मूलबिम्बे कृत्वा ध्यानसङ्कोचं कृत्वा कर्मबिम्ब आकृष्य संहारतत्त्वकलशेनाभिषिच्य मूलबिम्बे नियुञ्जीत। तत्राग्रे जीवकलशं सम्पाद्य मूलबिम्बात् पुरोदीरितरीत्या कृत्स्नं देवं जीवकलशमुद्वास्य कर्मबिम्बेऽपि देवं संकल्प्य तं तेन सम्यगभिषिच्य व्यापकादिकं विधाय तत्राग्रतोऽपि जीवकलशं विधाय तस्मिन् कर्मबिम्बात् पूर्ववत् उद्वास्य तं जीवकलशं प्रागुक्तक्रमेण विनियुञ्जीतेत्यर्थः।।१२२, १२३।।

---

१. 'क् कृत्वा पृ' ग. पाठः। २. 'र्वं त' ३. 'प्याङ्गसं' ग. पाठः। ४. 'रे'

Shripuram Publications
www.shripuram.org

इति तन्त्रसमुच्चये श्रुतार्चा-
क्रमसिद्ध्यै रविजन्मसम्प्रणीते।
दशमः सुसमापितः सहैकः
पटलो जीर्णसमुद्धृतिक्रियाढ्यः।।१२४।।

विमर्शिनी

पटलमुपसंहरति-इतीति। इति उक्तप्रकारेण श्रुतार्चाक्रमसिद्ध्यै गुरुमुखाच्छ्रुतस्य पूजाक्रमस्य सिद्ध्यै स्थिरतायै रविजन्मसंप्रणीते रविपुत्रेण नारायणेन सम्यग् विरचिते तन्त्रसमुच्चये ग्रन्थे जीर्णसमुद्धृतिक्रियाढ्यः जीर्णोद्धारविधिभिः बहुबेरविधिना च परिपूर्णः सहैकः एकेन सहितो दशम एकादशः सुसमापितः सुष्ठु यथाक्रमं समापितः।।१२४।।

इति तन्त्रसमुच्चयविमर्शिन्यां
एकादशः पटलः।।

www.shripuram.org

Shripuram Publications
www.shripuram.org